CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 173

Title Tarkaprakāśa

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 173 Subject : Nyāya.

Title : Tarka Prakāśa

Author : — Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 8" by 4·3" Extent : 96 [illegible]. No 17 is given twice. 68, 69 missing

Language : Sanskrit. Script : Devanāgarī.

Remarks : Incomplete. No 17 is given twice. 68, 69 missing. Ends abruptly

॥श्रीगणेशाय नमः॥ जटाजूटलसद्गंगाजलभूषितमस्तकः॥ पुनातु गिरिजाप्रेम
पात्रमेकमनेकधा॥१॥ उपजीव्योपजीवकभावसंगत्या उपमाननिरूपणानंतरं
शब्दं निरूपयन्॥ शिष्यावधानाय प्रतिजानीते॥ अथेति। अत्र ज्ञायमाननिरूपणा
नंतरं॥ पदस्य शब्दप्रमाणतयापदे उपमानोपजीवकत्वात् फलयोः स्वरूप
फलयोश्च संगतिर्बोध्या॰ तस्याश्च फलनिष्ठत्वेपि स्वाश्रयकरणयोः अपरं परासं
बंधेन करणनिष्ठत्वात्॥ करणयोरानंतर्यनियामकत्वमवसेयं॥ तथाहि श
क्तिपरिच्छित्तिरेवोपमितिः तस्याश्च सर्वस्या एव शाब्दबोधजनकत्वेन फल
योरुपजीव्योपजीवकत्वसंभवः॥ एवं स्वरूपफलयोरपि अतिदेशवाक्यार्थज्ञान
१ रूपोपमानप्रमाणस्योपमितिद्वारा शाब्दं वैधोपजीव्यत्वादिति॥ केचित्तु उपमा १
नानंतरं पदकरणत्वस्य शक्तत्वेन ज्ञायमानत्वादित्यर्थः॥ सविषयो हि विधिनिषे

ध्यो विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इति न्यायेन स्वर्गीयत्वं वत् विशेषणी
भूतशक्तिज्ञानमादायोपमानोपजीवकत्वसंभवेन स्वरूपतउपजीवकत्वमपि संग
तिरित्याहुः। पदज्ञानस्य शाब्दप्रमाणत्वे गौरवं च संभवेन स्वरूपनवीनमते उपमितेः
शक्तिपदविषयकत्वेन अतिदेशवाक्यार्थज्ञानात्मकोपमानप्रमाणस्योपमित्यात्मक
शाब्दप्रमाणेप्युपजीव्यत्वेन स्वरूपतउपजीवकत्वमुक्तं समेवेति द्रष्टव्यं॥ ननु अतिदेशवा
क्यरूपशाब्दप्रमाणस्यापि अतिदेशवाक्यार्थज्ञानरूपोपमानोपजीव्यत्वादुपमानमेवादौ
निरूपितं न तु शब्द इत्यत्र किं विनिगमकमिति चेन्न। प्रमाणतावच्छेदकधर्मावच्छि
न्नोपजीव्यता निरूपितोपजीवकतायाः एवात्र संगतित्वात्॥ प्रमाणतावच्छेदकधर्मश्च
इंद्रियत्वादिः अवच्छिन्नत्वं च व्यापकत्वं। एवं चोपमानस्य संकेतमात्रग्राहकतया
सर्वस्यैवोपमानस्य शब्दप्रमाणोपजीव्यत्वं। शब्दप्रमाणस्य तु न सर्वस्य अतिदेशवाक्या
र्थज्ञानात्मकोपमानोपजीव्यत्वं। अप्रमाणयेतिशब्दे तदभावात्। न च पदज्ञानत्वेन

शाब्दत्वावच्छिन्नं प्रति हेतुतयाघटमानयेति शाब्दनिरूपितशाब्दत्वावच्छिन्नकार्यताया
उपमानेसत्त्वात्उक्तदोषतादवस्थ्यमितिवाच्यं। प्रमाणविभाजकोपाधिधियतद्धर्मावि
च्छिन्नायाउपजीवकतायाविवक्षितत्वात्। प्रमाणविभाजकोपाधिश्चसाक्षात्कार
करणत्वादिः। अविछिन्नत्वंचात्रस्वरूपसंबंधविशेषः। इत्थंच। शाब्दत्वादेरुपमि
तिकरणत्वानियतत्वादतिदेशवाक्यार्थज्ञानत्वादेरेवतथात्वेनतस्यचप्रमाणतावि
च्छेदकशाब्दप्रमाणत्वव्यापकोपजीव्यतानिरूपितोपजीवकतायांनवछेदकत्वादुक्त
दोषाभावात्। केचित्तुपत्रकीदृगवयवइतिप्रश्नानंतरं चित्रलेखादिनाताद्दशपिंड
प्रदर्शने। तत्रातिदेशवाक्यं। विनापिमानसरूपातिदेशवाक्यार्थज्ञानात्मकोप
२ मानोदयेनव्याप्तिचारात्शाब्दोनोपजीव्यइतिउपमानेशाब्दोपजीवकत्वाभावान्मो २
विनिगमइतिवदंति। तदसत्। शाब्दीह्याकांक्षाशाब्देनैवप्रपूर्यतइतिन्यायात्तत्रापी
दृगावयवइत्याकांक्षप्रायिकशाब्दकल्पनाया आवश्यकत्वात्। शाब्दी-आकांक्षाशाब्दबोध

गोचरेणशब्देनैवविषयसिद्धिद्वारानिवर्त्यतइतितदर्थात्।। यदिच। यद्यपदृष्टुर्ज्ञानमात्रे
णेछानतुशाब्दबोधेतत्रशाब्दकल्पनानवकाशः तत्रशाब्दगोचरे। छायाभावेनताद्दशा
न्यायस्यानवतारात्।। नचातिदेशवाक्यार्थशाब्दत्वेनैवोपमितिकरणतयाशाब्दकल्प
नमावश्यकंपदजन्यपदार्थोपस्थितेरेवशाब्दबोधेहेतुत्वात्। शाब्दीशाब्दबोधेपयोगि
नीआकांक्षाअन्वयप्रतियोग्युपस्थितिरूपाशाब्देनैवप्रपूर्यते।। संपाद्यतेइत्यर्थोताद्दशन्या
यस्याप्रवर्तनादितिवाच्यं। अतिदेशवाक्यार्थशाब्दत्वेनोपमितिकरणत्वेमानाभावात्
परित्यज्यचनिश्चितव्यभिचारकंरूपंगृह्यमाणाव्यभिचारेणकारणत्वकल्पनानुपपत्ते
।।नचनिश्चितत्वमेपिदसंपशाब्दत्वस्यलघुतयातन्निवेशएवसम्यगितिवाच्यं। सादृश्यज्ञा
।।नचनिश्चितत्वमेपि...नैवानतिप्रसंगे
नोपमानत्ववाधितदवअतिदेशवाक्यार्थस्मृतिरूपव्यापाराभावेनैवानतिप्रसंगे
निश्चयत्वप्रवेशेप्रयोजनाभावादितिविभाव्यतेतथापिव्यवहारादिनापिशक्तिग्र
हाशाब्दबोधोदयेनव्यभिचाराच्छब्दप्रमाणेपिउपमानोपजीवकत्वव्याघातःको

चिकोपजीवकत्वस्य च शब्दप्रमाणत्वे उपमानप्रमाणेपि सत्वाद्विनिगमनाताद्वस्थ्यादिति न
किंचिदेतत्॥ तथाप्युक्तस्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वादिति न्याय एव विनिगमकः न
नुसंगतिरिति॥ तस्याः स्तुत्यत्वेपि न क्षतिरित्याहुरिति दिक्॥ निरूपितस्तत इति लक्षणस्व
रूपप्रामाण्यादिप्रकारकवर्तमाननिरूपणविषयः शब्द इत्यर्थः तत्रोशब्दे निरूपणीये।
शाब्देति॥ अत्र शाब्दप्रमितिकरणत्वं लक्षणं प्रमाणशब्दपदवाच्यत्वं लक्ष्यतावच्छेदकं प्रमि
तिकरणत्वमात्रे प्रत्यक्षादावतिप्रसक्तमतः शाब्देति॥ ननु शाब्दत्वं शब्दजन्यत्वं तथाच शब्द
जन्यप्रमाकरणत्वं लक्षणं पर्यवस्यति॥ तच्च विषयविधया शब्दजन्यप्रत्यक्षप्रमितिकर
णे श्रोत्रेन्द्रियेऽतिव्याप्तमित्यत आह॥ शाब्दत्वं चेति॥ तथाच शाब्दत्वस्वरूपजात्यवच्छिन्नप्रमि
नउ तिकरणत्वं लक्षणमिति नातिव्याप्तिरिति भावः॥ केचित्तु अतीतानागतशब्दानुसंधानादपि शा
ब्दबोधोदयाच्छब्दो न करणं किंतु तज्ज्ञानं शब्दज्ञानं॥ इत्थं च शब्दजन्यप्रमाकरणत्वस्य लक्षणत्वेऽ
३ संभवः॥ शब्दज्ञानजन्यप्रमाकरणत्वस्य लक्षणत्वे तु विषयविधया शब्दज्ञानजन्यप्रत्यक्ष ३

अनुत्तव… ज्ञातिः प्रत्यक्षत्वसाक्षित्वादिशून्यत्वे सति पदविषयकत्वाद्व्यभिचारिणी केवलीई
प्रमाकरणे मनस्यतिव्याप्तिरत आह॥ शाब्दत्वं चेतीत्याहुः॥ शाब्दत्वस्य प्रत्यक्षाघटितस्वरूप
त्वे गौरवादाह॥ शाब्दत्वं चेतीत्यपि कश्चित्॥ ननु लक्षणलक्ष्यतावच्छेदकयोरभेद इत्यत
आह जन्येति॥ केचित्तु ननु शाब्दत्वं प्रत्येमि पटं प्रत्येमि इत्यनुभवान्न तु शाब्दात्प्रत्येमीति
आत्मविशेषगुणानां विषयविनिर्मोकेणाननुपगमात्॥ तथाच शब्दजन्यघटादि
विधेयकज्ञानत्वमेव तद्विषयोनत्वमिति शाब्दत्वं जातिरित्यत आह॥ जन्यपदधीत्या
दि॥ तदसत्॥ शब्दलिंगकघटानुमितेरपि शब्दजन्यघटविधेयकज्ञानत्वेन तदुत्तरमपि शाब्द
यामितिप्रतीत्यापत्तेः॥ शाब्दत्वजातिस्वीकारस्यावश्यकत्वात्। तदस्वीकारमादाय द्वितीयल
क्षणप्रणयने तद्व्यापकशाब्दत्वस्येत्यग्रिमग्रन्थासंगतेश्चेत्यवधेयं॥ जन्यपदधीजन्य
त्वव्यभिचारिणी या ज्ञातिः उपमितित्वं तच्छून्यधीत्वमिति लक्षणार्थः अतिव्याप्तिवारणाय
ति। तत्रेति। प्रत्यक्षानुमितिस्मृतिष्वित्यर्थः॥ तादृशीनां जन्यपदधीजन्यत्वव्यभिचारि
अनुभवत्वव्यापिकानां सत्वादिति। तथाच तच्छून्यत्वाभावान्नातिव्याप्तिरिति भावः॥ स्मृ
तित्वस्य जातित्वं अनुभवसामग्रीप्रतिबध्यतावच्छेदकत्वेन। ननु प्रत्यक्षादावतिव्याप्ति

अनुभवत्वाव्यापकेत्यस्य व्याप्तिमाह अन्येति। तथा प्रसंगेन। तादृशेति जन्यपदधीज पं ८

वारणाय जातिशून्यत्वे। सतीत्यास्तां। यदि च शाब्देपि ज्ञानत्वादिजाति सत्वादसंभव इति
विभाव्यते। तदा अनुभवत्वाव्यापकजातिशून्यत्वे सतीत्येवास्तु इत्यत आह। जातिशून्य
त्वमिति। जातिशून्यत्वमात्रमित्यर्थः॥ अनुभवत्वेति। अनुभवत्वाव्यापकजातिशून्य
त्वमात्रमित्यर्थः॥ अनुभवत्वादीनामिति। आदिना ज्ञानत्वगुणत्वसत्वादिपरिग्रहः।
तथा चैतादृशजातीनां सत्वात् जातिशून्यत्वं न वक्तव्यमिति भावः। अत्र यद्यपि ज्ञानत्वा
दीनामित्येव। वक्तुमुचितं तथापि तदव्यापकेत्यत्र तत्पदेनानुभवत्वपरामर्शायानुभवत्वा
दीनामित्युक्तं। तदव्यापकेति॥ अनुभवत्वाव्यापकेत्यर्थः॥ व्यभिचारीत्यर्थः। नन्वनुभव
त्ववारणायानुभवत्वान्यत्वमेवोपादीयतां किंच आह। आदीनामिति। आदिना ज्ञानत्व
परिग्रहः॥ अनुभवत्वाव्यापकत्वं च अनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वं तेनानुभ
वत्वादिव्युदासः। न च नुभवत्वव्याप्यत्वमेव किं नोक्तं। ज्ञानत्वव्यापकत्वघटितत्वेनेति ४
४ चेन्न। व्यापकसामानाधिकरण्यादिरूपव्याप्तिनिवेशे गौरवात्॥ एवमनुभवत्वस्या

॥

पत्रे २

पि व्याप्यत्वात्तद्वारणीयभेदघटितव्याप्यत्वस्यावश्यवाच्यतया गौरवाच्च॥ मन्मते अनुभवत्वादि
भेदप्रतियोगितावच्छेदकत्वस्यानुभवत्वेनानुपपत्त्यभावात्॥ एतावतैव व्याप्तिवारणाय
चरमधीपदस्यानुभवपरत्वं विनापि कीहक्षेति॥ पदजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजा
तिशून्यत्वमिति लक्षणे ऽसंभवः ज्ञायमानपदस्य कारणत्वासंभवेन शाब्दत्वस्यापि पदजन्य
त्वव्यभिचारित्वात्। पदधीति। इत्थं च जन्यपदव्याप्तिमाह॥ पदधीति। नन्वनुमिति।
त्वस्य ताद्रूप्यसत्वात् कथमित्यव्याप्तिरत आह। अनुमितित्वस्येति। भगवदिति। अनु
मितित्वस्येश्वरीयपदधीजन्यत्वव्याप्यत्वेन आत्मत्वादिजातिरेव तथात्वं शून्यत्वं चानुमिति
तावप्रीत्यत्तिव्याप्तिः। जन्यपदोपादाने चानुमितित्वस्यापि तत्वेन तच्छून्यत्वव्यभिचार्यनुभ
वत्वाव्यापकजातिशून्यत्वं तमित्यर्थः। अत्र च जन्यपदे व्यभिचारीति धीत्वव्यभिचारीति ज
न्यधीत्वव्यभिचारीति धीजन्यत्वव्यभिचारीति जन्यजन्यत्वव्यभिचारीति वा नोक्तं। अ
नुमितित्वस्य जन्यज्ञानत्व जन्यव्याप्तिज्ञानजन्यत्वव्याप्यत्वात् तद्व्यभिचारिजातिशून्य
त्वस्यानुमितावपि सत्वादतिव्याप्तेः। जन्यपदधीत्वव्यभिचारीजाति ५
त्वाभावतदतिरिक्तिभावः। अतः पतिव्याप्त्यादिनः। समुदितमिति। जन्यपदधीजन्य

अत्यपदत्वादिजातिशून्यत्वादितिभावः। अन्यान-पदविषयकाव्यभिचारि
मेर

शून्यत्वमात्रोक्तौ शाब्दत्वस्यापि तथात्वेनासंभवापत्तिरिति विशिष्टमुपादेयमेव नन्वन्य
न्यपदधीजन्यत्वव्यभिचाराय नुवत्ताव्यापकजातिशून्यत्वं चेत् तदा एम स्थले तं विशेषणदले
नेत्यत आह। उपमिताविति। उपमितेः पदविषयकातिदेशवाक्यार्थज्ञानजन्यत्वनिय
मेन जन्यपदधीजन्यत्वव्यभिचारे जातिशून्यत्वमित्यर्थः। पदविषयशाब्दबोधे पदस्यापि भा
नात्पदविषयकत्वसमानाधिकरणशाब्दत्वशून्यत्वाभावादसंभव इति समानाधिकरणेति
विहायाव्यभिचारीति। ननु सर्वत्र शाब्दबोधे पदस्य भाने बाधकाभावात्। अनैरैति शाब्दत्व
स्यापि पदविषयत्वाव्यभिचारित्वमेवेति चेन्न। इत्यापदजन्यपदार्थोपस्थितितात्पर्यज्ञा
नादेरेव शाब्दबोधहेतुतया शब्दस्य सर्वत्र ज्ञानेमानाभावात्। यत्र भिन्नविषयकानुमिति
सामग्रीकाले घट मानयेति। वाक्यच्छावणाद् बोधः। तत्र शाब्दविषयकशाब्दं जायतामिति पर
५ ...विशेषरूपविशिष्टानुमितिसामग्र्याः प्रतिबंधकत्वेन शाब्दशाब्दानुपत्तेश्च शा
ब्देच्छार्य अपि तत्रोक्तेजन्यत्वेन तदिच्छाभावकूटनिवेशो नातिगौरवात्। निर्थो विशेषण ५
विशेषणभावे विनिगमनाविरहेणानंतकार्यकारणभावापत्तिश्चेति शाब्दविषयकशा
ब्दत्वस्यैवोत्यात्तशाब्दपदविषयकत्वाव्यभिचारित्वाभावे
त्वप्य

नासंभवाभावादिति न किंचिदेतत्। ज्ञाताविति। ज्ञात्यादावित्यर्थः। तत्र ज्ञात्यभावादि
तिभावः। मणिकृतस्तु। प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणमिति शब्दलक्ष
णं। प्रयोगो वाक्यं तद्धेतुभूतं यत् पदार्थतत्त्वज्ञानं तज्जन्यशब्दत्वं प्रमाणशब्दत्वमित्यर्थः। वा कि
न४ क्यार्थज्ञानमादाय वह्निना सिंचतीत्यादावयोग्ये त्तिव्याप्तिवारणाय तत्त्वपदं। तथापि पदार्थ
तत्त्वज्ञानमादाययोग्येत्ति। व्याप्तेः प्रयोगहेतुभूतेति। इत्थं च अर्थपदस्य वाक्यार्थपर
त्वपर्यवसानात् न पदार्थतत्त्वज्ञानमादायातिव्याप्तिः। तथाहि। हेतुपदसमभिव्याहा
हृतपदस्य हृप्राधान्याविति धात्वनुसारात्। इतरनैरपेक्ष्येण व्युत्पन्नेन तयासजातीयनैर
पेक्षस्यात्र विवक्षितत्वात् तयानीदृ प्रयोगप्रतिपाद्यज्ञाने प्रयोगे कर्तव्ये प्रयोगप्रतिपाद्य
ज्ञानांतरं नापेक्षते ताद्दशार्थतत्त्वज्ञानजन्यत्वं लक्ष्यं न हि वाक्यार्थज्ञानवत् पदार्थज्ञा
नमपि अर्थज्ञानानपेक्षं प्रयोगहेतुः वाक्यार्थतात्पर्यज्ञानस्यैवापेक्षणादिति। ...व
न प्रयोजो वाक्यं तथा च। तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकं ज्ञानं प्रकृ
ते। वाक्ये जननीये स्वस्मिन् जननीये प्रयोगप्रतिपाद्यज्ञानांतरं तत्कालीनतत्पुरुषीयक्षा

नांतरं नापेक्षते तादृशार्थतत्त्वज्ञानजन्यत्व*मर्थः॥ संस्कारादावतिव्याप्तेर्लक्षणे शाब्द
पदं। प्रमाणमात्रस्य लक्षणे प्रत्यक्षादावतिव्याप्तेर्लक्ष्येपि शाब्दपदमनुषंजनीयमिति।
ननु तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयकप्रमांतरं कंचन प्रमाणं ज्ञानं स्वस्मिन् जन
नीये तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयकप्रमांतरं नापेक्षते। तादृशप्रमाजन्यश
ब्दत्वं तत्कालीनतत्पुरुषीयकं प्रमाणशब्दत्वमिति प्रजितं। प्रमात्वं च भ्रमभिन्नत्वं। नातश्चा
क्षिकप्रमाणे मानाद्यातिप्रसंगः इत्थं च वह्निनासिंचतीत्यादौ पदार्थतत्त्वज्ञानस्य समानजाती
यवाक्यार्थज्ञानांतरापेक्षत्वात्तदादायातिव्याप्तावपि धंदनिघातेयावस्तूपेष्टसाधन
ताप्रमामादायातिप्रसंगः। वह्निकरणकसेकानुकूलकृतिमानिति। प्रकृतवाक्यजन्यज्ञान
विषयकार्थतत्त्वज्ञानत्वात्। तेन च वाक्येन योग्यतया स्वसजातीयज्ञानांतरानपेक्षणादिति।
६ एवं शब्दो द्रव्यमिति वाक्यस्यापि तादृशवाक्यस्यापि तादृशवाक्यजन्यज्ञानविषयतया तादृ
शवाक्यजन्यज्ञानविषयवाक्यविषयत्वाद्यरूपेष्टसाधनताप्रमामादाय शब्दो द्रव्यमित्य ६

क

योग्यवाक्येतिव्याप्तिः॥ अपि च पर्यंकरणकसेकानुकूलकृतिमान् गुणश्च व्याप्तत्वं त्रिकभ्रमा
भकसमूहालंबनजन्ये पयसासिंचतीत्यादिवाक्येऽव्याप्तिः॥ तादृशवाक्यार्थज्ञानस्य भ्रमत्वं नि
श्चयाभावात्॥ ईश्वरीयवाक्यार्थज्ञानस्य च स्वसमानजातीयान्तरीयवाक्यार्थज्ञानस्यापेक्षित
यातदादाय लक्षणगमनात् अन्यथा तदीयपदार्थतत्त्वज्ञानमादाय योग्ये तिप्रसक्ते दुर्वा
रत्वात् इति दिक् यथमेतद्दिच्चेतन्मैवं। यादृशार्थतत्त्वज्ञानं स्वसमानजातीयज्ञानांतरानपेक्षं। स
त्प्रयोगहेतुस्तज्जन्यत्वमिति। न ज लक्षणार्थः किं तु प्रयोगहेतुर्भूतं यदर्थतत्त्वज्ञानं प्रकृतवा
क्यार्थविषयकं तत्त्वज्ञानं तज्जन्यत्वं लक्षणं। तत्कालीनतत्पुरुषीयस्वजन्यज्ञानेय यत्संसर्गा
कयद्यत्प्रकारकत्वावच्छिन्नं पद्यद्विशेष्यताकं तत्संसर्गकतत्प्रकारकतद्विशेष्यताकभ्रम
भिन्नज्ञानजन्यशब्दत्वं तत्कालीनतत्पुरुषीयप्रमाणशब्दत्वमिति पर्यवसितार्थः। वह्निना
सिंचतीत्यादौ वह्निकरणकसेकानुकूलकृतिमानिति बोधोदये न तद्विषयविषयकज्ञान
स्य भ्रमत्वान्नतत्रातिव्याप्तिः॥ एवं शब्दो द्रव्यमित्यादावपि भ्रमात्मकसमूहालंबनजन्ये

रा

पयसासिंचतीत्यादौ इन्धनीयप्रमामादाय संगतिः। एवमुक्तौ रितवाक्ये मौनिश्लोकादावपीति।
अथ यत्र वह्निना सिंचति पयसा सिंचतीत्यादि वाक्याभ्यां वह्निकरणक सेकानुकूलकृतिमान्।
पयःकरणक सेकानुकूलकृतिमान् ~~पयःकरणक सेकानुकूलकृतिमान्~~ इति समूहालंबन
शाब्दबोधः। तत्र पयसा सिंचतीति वाक्ये व्याप्तिः तद्वाक्यजन्यज्ञानं यद्यद्विशेष्यताकेन तद्विशे
ष्यताकभ्रमभिन्नज्ञानाप्रसिद्धेरिति वाच्यं। यद्यद्विशेष्यताकत्वांशे स्वजन्यतावत्तद्विशेष्य ८
कभ्रमभिन्नज्ञानस्य विवक्षितत्वादित्याहुः। इदं च बुबोधयिषा सर्वत्र वाक्यस्यावच्छिन्नं
प्रतिवाक्यार्थज्ञानं हेतुरिति संप्रदायमतेन। चस्त्वतस्त्व। बुबोधयिषया अन्यथासिद्धतया
तस्य कारणत्वासंभवेन तदुपेक्ष्य शाब्दप्रमितिकरणं शब्द इति पुनः इति तन्निर्वचनलक्षणमत्र
७ कृतमिति ध्येयं। प्रत्यक्षातिरिक्तप्रमाणस्य लक्षणाभाव इति शब्दस्य प्रमाणत्वं तथ्यर्थं ७
तन्निर्वचनेनेति चार्वाकमतं कृतात्पर्यन्ते शब्दस्य प्रमाणत्वं साधयति। सोयं शब्द इति।
शाब्दप्रमितिकरणं शब्दस्यार्थः। सकृज्जेति। शाब्दं करणमित्यनुभवविषयइत्यर्थः। इत्य

पत्तवइति। तादृशप्रत्यक्षस्य अन्यविषयकत्वे बाधकः शब्दविषयकत्वएव पर्यवसानेन
शब्दसिद्धिः। प्रतीतेस्तत्साधकत्वेन ~~साधकत्वे~~ साधकत्वेपदार्थमात्रोच्छेद इति भावः। ननु नवयं
शब्द एव नास्तीति शब्दयोप्यतिरिक्तशाब्दप्रमितिप्रकरणत्वमेव नास्तीत्यत
आह। तज्जनकत्वमप्रतीति। तस्य शाब्दजनकत्वमपि शाब्दप्रमितिजनकत्वमपीत्यर्थः। प्रत्यक्त
क्तसोयं शब्द इति पाठः। शाब्दस्यानीति प्रतीतिसिद्धः शाब्दबोध इत्यर्थः; तज्जनकत्वम
पि। शाब्दे तादृश शाब्दप्रमितिकरणत्वमपीत्यर्थः। तथा चरपत्तुयं। तत्र हेतुमाह। आ
गोपितेति। प्रतीतेरिति। वाक्यादमुमर्थं प्रत्येमीतिज्ञानस्य प्रत्यक्षविषयकत्वासंभवेन
प्रत्यक्षातिरिक्तप्रमितिस्वीकारः तत्करणस्वीकारश्चावश्यक इति भावः। ननु लक्ष्ये
शब्दस्य प्रमाणत्वं श्रात्वा तज्जन्यज्ञानस्य प्रत्यक्षातिरिक्तत्वं तथानुमित्यामवत्वमेव तज्ज
न्यज्ञानस्यास्तु तो व्यर्थं पृथक् तन्निरूपणमित्यत आह। केवलेति। अनुमानविधया
अनुमानत्वेन। अन्यथा वेति। शाब्दविधया वेत्यर्थः। नतु तस्य प्रत्यक्षातिरिक्तप्रमिति

जनकत्वमेव नास्तीति विवाद इति भावः। विप्रतिपत्ताविति॥ विप्रतिपत्तिश्च शाब्दः अनुशाब्दे
मितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नजन्यतानिरूपितप्रमाणविभाज
कोपाधिनियतधर्मावच्छिन्नजनकताश्रयो न वेत्याकारा। अत्र विधिकोटिर्नैयायिकानां।
निषेधकोटिर्वैशेषिकानां विधिकोटिप्रसिद्धिः प्रत्यक्षप्रमाणे इन्द्रियस्यैव प्रत्यक्षप्रमा
णतया प्रत्यक्षप्रतीन्द्रियत्वेन हेतुत्वेन तादृशजनकताश्रयत्वात्। निषेधप्रसिद्धिश्च घ
टादावेवसुलभा। अत्र सिद्धसाधनवारणायानुमितित्वासमानाधिकरणप्रमितिवि
भाजकोपाध्यवच्छिन्नत्वनिवेशः। प्रत्यक्षे विषयस्य हेतुतया शाब्दव्यापिसाधारणत्वा
वच्छिन्नजन्यतानिरूपितजनकताशालित्वात्। प्रमाणेऽपि विभाजकोपाधिनियतधर्माव
प्रि च्छिन्नत्वनिवेशः॥ अनुमितिभिन्नशाब्दाविषयकप्रमितिकरणं नवेति॥ प्रत्यक्षानुमित्यन्य
८ तरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यकोन वेत्याकारा वा पृथगिति॥ अनुमितिभिन्नशा ८
ब्दाविषयकप्रमितिकरणमित्यर्थः। अतो न सिद्धसिद्धिव्याघातः। नन्वनुमानं नतु प्रत्य

॥ नतु प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यकं। अतो न शाब्दलिंगकानु
मानमादायबाधः। न च इदं घटानयनादिरूपार्थकं शाब्दत्वादित्यनुमानं स्यादत
आह। शाब्दस्येति। अर्थाव्याप्यत्वात्। स्वजन्यप्रतिपत्तिविषयार्थनिरूपितव्याप्यभाव
वत्त्वादित्यर्थः। अव्याप्यत्वमेव दर्शयति। नहीति। तदहमित्यादि। आकारगाहित्वा
त्॥ तथा चाप्रतिपत्तिसामानाधिकरण्यरूपव्याप्तिः शाब्देन संभवति। साध्यहे
त्वोर्वैय्यधिकरण्यादिति भावः॥ ननु घटमानयेति। पदानि तात्पर्यविषयस्मारि
तपदार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिमत्पदकदंबत्वादित्यनेन वैय्य
धिकरण्यं न च रजतेन ज्ञानवानयमिति। ज्ञानात् भ्रांतिरूपघटत्वापत्तियाणाप्रतु
रोहत्वविशेष्यकरजतावच्छेदकप्रकारकज्ञानस्यैव। प्रवर्तकत्वान्नतन्सिद्धिरि
ति वाच्यं। लाघवात्। प्रवृत्तिविषयरजतावच्छेदकावैशिष्ट्यावगाहिज्ञानत्वेनैव प्र

वर्त्तितया साध्यस्य ज्ञानपदस्य च प्रमापरत्वेन प्रमात्वघटकतया प्रकृते तत्साध्यदुरु
त्वात्॥ न च अनुमितेर्व्याप्यप्रकारतावच्छेदकप्रकारकत्वनियमे न स्मारितपदार्थत्वेनैव
रजतादिसिद्ध्येत्॥ ननु रजतत्वादिनां प्रमेयत्वादिना तादृशज्ञानस्य प्रवर्त्तकत्ववा
रणाय रजतत्वादिप्रकारकज्ञानस्यैव प्रवर्त्तकत्वादिति वाच्यं एवं रजतत्वादिना र
जतत्वादेरुपस्थितत्वात्। स्वरबाधवशेनैतेन रूपेणानुमितौ भानसंभवात्। अत एव
व सकर्तृकत्वानुमाने लाघवोपनीतं मेकत्वादिकमपि भासते लाघवज्ञानेतर
बाधातिरिक्तस्थले एव च व्यापकतानवच्छेदकरूपेण भानानुपगमादिति॥
यद्वा। एते पदार्थास्तात्पर्यविषयमिथःसंसर्गवन्तः आकांक्षादिमत्पदस्मारितत्वा
दित्यनुमानेन विशिष्टरजतत्वादेः प्रकृतावच्छेदकतया तत्सिद्धिः। न च नदीजल ६
संसर्गपरतया चरिते अत्रैव विमतं जलं नद्याः कच्छे महिषश्चरतीति वाक्ये अत्र व्याप्य

केन नदीकच्छपदार्थयोर्व्यभिचारः॥ तात्पर्यगर्भसाध्यासत्त्वादिति वाच्यं। तात्पर्यगर्भप
रस्परनिरूपितत्वाकांक्षादिमत्त्वाभावेनैव व्यभिचारात्॥ ननु तथापि हेतुतावच्छेद
कावच्छिन्नहेतुमत्तानिश्चयस्यैवानुमितिहेतुतया यत्र योग्यतासंशयस्तत्र यो
ग्यतागर्भहेतुमत्तानिश्चयाभावाद्वाक्यार्थबोधप्रसंगः। न च योग्यतासंशयस्य
बाधसंशयपर्यवसन्नतया साध्यसंदेहस्य चानुमित्यनुगुणतया पक्षताघटक
संशयातिरिक्तसंशयान्यत्वमेव हेतुमत्तानिश्चयस्येति वाच्यं। गौरवात्। साध्य
व्याप्यसाध्यवान्न वेत्याकारकसंशयान्येव हेतुमत्ता। इत्यनुमित्यापत्तेश्चेति चेन्न।
अयं नालीको धूमो वा वह्निव्याप्य इत्यत्र यथापि वह्निव्याप्यत्वस्य हेतुतावच्छेदकसंदेहे
पि नैयायिकैरनुमितेरभ्युपगमात्॥ व्याप्यवत्तानिश्चयत्वेनैवानुमितिहेतुत्वं तस्य
च योग्यताकूपहेतुविशेषणसंदेहेऽपि संभवान्न काप्यनुपपत्तिरिति संक्षेपः। इदं यत्ते चे
त्। ननु व्याप्तिभ्रमादेवानुमितिरस्तु। न च भ्रमात्मकपरामर्शजन्यत्वादनुमितेर

मत्वापत्तिरितिवाच्यं। विषयबाधस्यैव चमत्कृतनियामकत्वेन दोषाभावादित्यत आह। इत्यपत्ते
चेतीत्यपि कश्चित्। आभातीति। परनिष्ठव्याप्तिज्ञानशून्यानामित्यर्थः। न चेनीति। नहीत्यर्थः।
अयं व्याप्तिज्ञानशून्यकालीनः शाब्दप्रयोज्योऽनुभवः तस्याः अनुमितेः नतु इदं व्याप्तिज्ञा
नाजन्याविलक्षणैवानुमितिः। न च तत्रानुमितित्वसत्त्वेमानाभावः। समानेविषयेशाब्द
सामग्र्याबलवत्त्वादनुमितिप्रतिशाब्दसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं। मन्मतेन
शाब्दाभिन्नानुमिस्वीकारे एतत्र तदप्रतिबंधकत्वात्। एवं भिन्ने विषये अनुमिति
सामग्र्याः शाब्दसामग्र्याश्च प्रतिबंधकतोद्दयकल्पने गौरवं। मन्मतेनुमितिसामग्र्याप्रतिबं
धकतयैवोपपत्तेरित आह। प्रतिभातीति चेति। अनुमितमिति। न च व्याप्तिज्ञानादिघटि
तसामग्रीजन्यानुमितित्वाभाव एव तद्विषय इति वाच्यं। व्याप्त्याद्यप्रतिसंधानेपि तस्या
१० अनुभवसिद्धत्वात्। असाधारणमिति। यद्यपिनोपमितमित्यपि वक्तुमुचितं तथापि उ १०
पमितेः शक्तिमात्रविषयकतया घटादिविषयकज्ञानस्य ततोऽसंभवेन तन्निराकर

णस्य निष्प्रयोजनकत्वात्। नोपमितमिति शेषस्त्यापि कश्चित्। तथा च शाब्दजन्यज्ञा
नेनुमिति। बाधाभावेन विलक्षणप्रमित्ये तस्वीकारस्यावश्यकतया तत्कारणस्य प्रमा
णांतरत्वमावश्यकमिति भावः। फलमिति। नैयायिकशाब्दजन्यशाब्दबोधविषयस्त्यर्थः
अधानोनानार्थत्वेन शाब्दत्वे विशिष्टशक्त्यत्वात्। अत एवाभावारमैत्रैरुक्तं। श्रो पि
तव्य इत्यादि। श्रुतिरप्युपपद्यते। इदं घटत्वं कर्म कानयनादि नैयायिकेभ्य इति।
वैशेषिकस्य शाब्दोद्धारयिष्टत्वे लिंगविधयैव तद्बोधकत्वात्। नैयायिकेभ्य इत्युक्तं। नै
प यायिकानां शाब्दे कायिवोद्धारणात्। शाब्दतात्पर्यज्ञानसंभवात्। शाब्दबोध एवश्रोत
रितिभावः। नरत्वीमांसकास्तु। लौकिकवाक्यस्थले शाब्दबोधात्पूर्वं प्रत्नेन वाक्या
र्थगोचरयथार्थज्ञानवदुक्तत्वरूपाप्तोक्तत्वानुमितिसामग्री सत्त्वेन आप्तोक्तत्वानु
मितिसंभवात्। वाक्यार्थज्ञानस्यावश्यकत्वात्। तदुत्तरं च वेदस्यान्कृतत्वाच्छाब्दसा
मग्रीतः शाब्दोत्पत्तेः। लौकिकः शाब्दोऽनुवादकः।।

अनुवादकत्वस्य गृहीतग्राह्यनुभवमात्रजनकत्वरूपत्वात् । स्वसमानाधिकरण
स्वाव्यवहित तत्पूर्ववर्त्ति स्वसमानाकारनिश्चयविषयकतद्विशेष्यकतत्प्रकारकानुभ
वमात्रजनकत्वरूपत्वादिति यावत् । स्वयदमनुभवपरां वेदस्यापौरुषेयत्वेना
प्तोक्तत्वानुमानं संभवादनुवादकत्वात्प्रामाण्यं अनधिगतार्थानुभवकरणत्वस्यै
व प्रामाण्यरूपत्वात् तच्च गृहीतग्राहीतरानुभवकरणत्वं स्वसमानाधिकरण
स्वाव्यवहित तत्पूर्ववर्त्ति स्वसमानाकारनिश्चयविषयविषयकेतर तद्विशेष्यकत्वप्रका
रकानुभवकारणत्वमिति यावत् ॥ स्वसमानाकारत्वं च स्वस्मिन्यादृशतद्विशेष्यकत्वा
वच्छिन्नतत्प्रकारितानादृशतद्विशेष्यकत्वावच्छिन्नतत्प्रकारताशालित्वमित्युक्तं:
तदसत् । व्याप्तिस्मृतिविलंबेनाप्तोक्तत्वानुमितिसामग्र्यभावे प्रथममेव शाब्दबोध
११ दनुवादकत्वेनाप्रमाणत्वात् । ननु लौकिकवाक्ये यदमाप्तोक्तं न वेति संशये शाब्दबो ११
धा धोदयात् । संशयव्यतिरेकनिश्चयौ यत्र प्रतिबंधकौ तन्निश्चयस्य हेतुरनुमितौ व्याप्ते
उ घत्

रिवेति नियमेनाप्तोक्तत्वनिश्चयस्य हेतुत्वात् । शाब्दबोधपूर्वं तस्यावश्यकत्वेति चेन्न ।
तत्कार्यतावच्छेदकं हि शाब्दत्वं वा लौकिकवाक्यजन्यशाब्दत्वं वा लौकिकत्वेन ज्ञातवाक्य
जन्यशाब्दत्वं वा नाद्यः । वेदे तदभावात् । न द्वितीयः । आप्तोक्तत्वानिश्चयेपि वेदानुकार
णपरमाणैर्मन्वादिवाक्येऽपौरुषेयत्वाभिमानिनो गौडमीमांसकस्य शाब्दोदयेन व्य
भिचारात् । नापि तृतीयः लौकिकत्वेन ज्ञातलौकिकवाक्यस्थजनकपशाब्दसामान्यसाम
ग्रीत एव लौकिकत्वेन ज्ञातवाक्यादपि शाब्दोत्पत्तिसंभवे तस्याकारणत्वात् । न च यत्सं
शयेत्यादिनियमेन तद्धेतुत्वमिति वाच्यं तत्संशयेपि वाक्यार्थबोधोत्पत्त्या तत्संशयस्या
प्रतिबंधकत्वात् । अव्यभिचारत्व संशयव्यतिरेकनिश्चयप्रतिबंधे व्याप्तिज्ञाने व्यभिचारे
णाप्रयोजकत्वेन च तादृशनियमाभावात् । तेन शाब्दसामान्ये नाप्तोक्तत्वनिश्चयो विरहो
हेतुः । स्वतन्त्रो वेदे आप्तोक्तत्वानुमानात् वेदत्वे पौरुषेयत्वानुमानात् । न च अपौरुषेयत्व

निश्चयस्य दशायामेव वेदस्यानुभावकत्वे दोषवत्पुरुषप्रणीतपदसमूहे तत्स्वरूपहेतुज्ञान
सत्त्वेन पदार्थसंसर्गसिद्धिसंभवात् । वेदस्याप्यनुवादकत्वापत्तिरिति वाच्यं । व्याप्तिस्मृ
तिविलंबेन तद्विलंबवदिति परास्तं । अनुप्रोक्तसंशयस्याप्रतिबंधकत्वात् । योग्य
तासंशयवदिति दिक् । आकांक्षायां क्वचिद्भ्रमः क्वचित्प्रमेति नियमनिर्वाहाय शाब्द
प्रमात्वावच्छिन्नं प्रति किंचित्कारणमुपेयं । तच्च न योग्यतान्वयप्रयोजकरूपत्वरूप
योग्यतायाः करकाभिप्रायप्रयुक्तपयसा सिंचतीत्ययोग्यवाक्येपि सत्त्वात् । अथ दोषाभा
व एव तथास्तु दोषाश्च भ्रमप्रमादविप्रलिप्साकरणापाटवरूपाश्चत्वारः निष्ठाः । भ्रमश्च
उच्चारणीयवाक्यार्थनिश्चयव्यतिरेकः । उच्चारयितव्यवाक्यार्थनिश्चयव्यतिरेकवारणाय
१२ षष्ठ्यंतेन निवेशः । अन्यथा प्रतीतस्यार्थस्यान्यथा प्रतिपिपादयिषा प्रतारणेच्छा सैव च १२
वा विप्रलिप्सा इच्छाविषयीभूतवर्णानुकूलत्वेन ताल्वाद्यभिघातानुत्पादकत्वेना
वाक्यार्थगोचरो भ्रमः । प्रमादः । नवधानता । सा च वाक्यार्थज्ञानस्वरूपयोग्यस्वरूपं उच्चारणीय । ठी ३

परवर्णानुकूलत्वे कंठताल्वाद्यभिघातः करणापाटवं करणं कंठताल्वाद्यभिघातः तस्यापाट
वं असामर्थ्यं इच्छाविषयीभूतवर्णानुकूलत्वमिति यावत् । इत्थं च प्रतारक
वाक्ये संवादेन प्रमाणे प्रतारणारूपदोषसत्त्वेन व्यभिचारात् । अन्यथा प्रतीतस्याविद्य
मानार्थप्रतिपिपादयिषाया एवात्र प्रतारणात्वेनोक्तदोषत्वादेपि सर्वसाधारणदो
षत्वस्यैक्याभावेन तत्तदभावस्य प्रत्येकं कारणत्वे भ्रमसत्त्वेपि अन्यदोषाभावसत्त्वा
त्प्रमापत्तिः अभावकूटस्य कारणत्वे गौरवात् विसंवादिशुकवाक्यादपि प्रमापत्ते
श्च । तस्माद्यथार्थतात्पर्यकत्वमेव लोके वेदसाधारणं शाब्दप्रमाप्रयोजकं यथार्थ
तात्पर्यकत्वं च यथार्थवाक्यार्थप्रतीतीच्छया उच्चरितत्वं एकपदार्थप्रतीतीच्छयो
च्चरितत्वमिति यावत् उच्चरितत्वं चानुसंधीयमानत्वं तेन तत्कर्तृकवर्णानां नित्ये
वेदस्वरूपत्वेपि नासंभवः । न वा मौनिश्लोकाव्याप्तिः । वेदेतु पूर्वपूर्वाध्यापकेच्छामादाय

ध

संगतिः॥ तत्सर्वपथेमानवेदस्य पंडितप्रमानवेदादभिन्न एव वेदस्य नित्यत्वात्।
नित्यानुमेयवेदेऽ तदर्थज्ञापकत्वेनज्ञानमन्येवसामग्र्यां तेनव्यभिचारः। कुत्रचिद्वा
क्येपि। शिक्षकवाक्यमादायोपपत्तिः वर्णानां तन्मतेनित्यैकरूपत्वात्। नच दैववशात्प
मत्तकबालादिवाक्ये गत्यनावश्यकेति वाच्यं स्यात्तस्याप्रमाणत्वात्। व्यवहारस्तु भ्रमादान
त्वसंसर्गाग्रहाद्वेति॥ केचित्तु कुत्रबालादिभिन्न लौकिकवाक्ये यथार्थवा व्यर्थप्रतीति
प्रयोजनरितत्वे वेदेवेदवादिकुत्रबालादिकावेबाधितार्थस्येनान्नेवशाब्दभ्रमाप्रयोजकत्वं
एकशक्तिमत्त्वेन वचनेष्वकारणत्वमितिनानिनुगमः॥ नचसर्वत्राबाधितार्थकत्वमेवा
प्रयोजकमस्त्विति वाच्यं। यत्रान्यघटाभिप्रायेणैहघटोस्तीत्युक्तेघटोनरंडस्यानं
अनयति। तत्रान्यपरत्वेनाप्रमाणेपि प्रमाण्यापत्तेः। नतु तस्य परत्वेशब्दः स्वार्थाद्यो
यत इतित्याहुरिति दिक्॥ तच्चज्ञानमुपयुज्यते। ज्ञायमानकरणज्ञानोपयोगिव्यभि १३
चारिवैलक्षण्यत्वात्॥ व्याप्तिवच्छब्दशक्तिवच्चेति तज्ज्ञानेहेतुःज्ञानकुपयुज्यते॥

शाब्दबोधनिरूपितज्ञाननिष्ठकारणतायां विषयतासंबंधेनावच्छेदकं शाब्दबोधनिरू
पितज्ञानावच्छिन्नकारणताश्रयस्य शाब्दबोधजननीये उपयोगित्वे सतिसहकारि
त्वेसतिव्यभिचारिवैलक्षण्यत्वादित्यर्थः॥ सामान्यलक्षणी च व्याप्तिंयत्रयज्ज्ञान
निरूपितज्ञानावच्छिन्नकारणताश्रयस्य यज्ज्ञानेजननीयेसहकारित्वेसतिव्यभि
चारित्वेसतिव्यभिचारिवैलक्षण्यंभवति। तत्तद्ज्ञाननिरूपितज्ञाननिष्ठकारण
तायां विषयतासंबंधेनावच्छेदकं नवचित्यथा व्याप्तिः शाब्दशक्तिश्चेति। अचक्षुयोवय
॥२५ वेंद्रियसंनिकर्षे व्यभिचारणायज्ञायमानकरणइति। शाब्दबोधं प्रतिज्ञायमानेकरण
स्यशाब्दस्यस्वरूपत्वेन जननीये उपयोगिनिशब्दनिष्ठश्रोत्रसमवाये व्यभिचारइति
ज्ञानोपयोगीति। तथा च यज्ज्ञाने प्रतिज्ञायमानकरणं तदज्ञाने जननीये सहकारीत्य
र्थान्नदोषः। नच सद्धिंगपरामर्शे व्यभिचारः ज्ञायमानत्वस्य ज्ञानविशिष्टत्वेधीत्व
परामर्शस्यज्ञायमानासहकारित्वात्। यस्मिन्नसतिपदभावात्कार्याभावस्तस्यैव

तत्सहकारित्वेन स्वरूपे विशिष्टे स्वासहकारित्वात् । तथा चातज्ज्ञाननिरूपितकारणताव
च्छेदकज्ञानविशिष्टकरणस्य ज्ञायमानत्वघटितधर्मावच्छिन्नकरणताज्ञानेजननीये
सहकारित्वमर्थः ॥ पर्यवस्यति । परामृश्यमाणलिंगत्वेनैवानुमिति । करणतया परा
मर्षविशिष्टसत्वे परामर्शाभावासंभवान्न व्यभिचारः ॥ ह्रदो वह्निमान् ह्रदत्वादित्यादौ
म परामृश्यमाणलिंगत्वेपि व्याप्त्यभावेन प्रमानुमित्यभावात् व्याप्तिवदिति दृष्टान्तसं
गतिः व्याप्तिपदे धर्मनावच्छिन्नलिंगत्वेन प्रमानुमितिकारणत्वात् ज्ञायमानशब्दसत्वे शब्द
सत्वे शब्दसमवायाभावासंभवेनैशब्दसहकारित्वस्य च शब्दसमवायाभावेपि त्रा
घटत्वे धूमत्वसामान्यलक्षणाजन्यपरामर्शे विशिष्टधूमसत्वेपि धूमनिष्ठरूपा
भावेन धूमत्वावच्छिन्नानुदयात् परामृश्यमाणधूमस्य प्रत्यक्षे जननीयेसहकार
१४ त्वेन धूमनिष्ठरूपादौ व्यभिचारवारणाय ज्ञानोपयोगित्वं चैतत् प्रमाणत्वघटितधर्मा १४
वच्छिन्नकारणताकज्ञानपरस्य ज्ञानपदस्य निवेशः । अत्रेदं चिन्त्यं । परामृश्यमाण

लिंगसत्वेपि सल्लिंगपरामर्शाभावसंभवात् । कथं सल्लिंगपरामर्शे व्यभिचारनिरासः
न च प्रमाज्ञाने प्रत्युपयोगितया तज्ज्ञानकरणतावच्छेदकज्ञाने विशिष्टकरणसहकारि
त्वं विवक्षितं सत्परामृश्यलिंगत्वेन प्रमानुमितिहेतुत्वेन सल्लिंगपरामर्शस्य प्रमानुमि
तिं प्रत्येवोपयोगितायाः प्रमानुमितिकरणतावच्छेदकसत्परामर्शविशिष्टसत्वे सत्परा
मर्शाभावसंभवदिति वाच्यं ॥ तथा सति । व्याप्तिवदिति दृष्टान्तासंगतेः व्याप्तिपदे धर्मेना
वच्छिन्नलिंगत्वेन प्रमानुमितिं प्रत्येवोपयोगितया सत्परामर्शविशिष्टलिंगसत्वे व्याप्त्यभा
वासंभवेन तादृशसहकारित्वस्य व्याप्तावेवाभावादिति । आत्ममनोयोगबाधाभावा
दिवारणाय व्यभिचारिवैलक्षण्यत्वादिनिवेशप्रमित्यजनकव्यावृत्तत्वं प्रमित्यजने
द्रूज्ञानजनकस्य मनअप्रविष्टत्वमिति यावत् ॥ न च सर्वांशे भ्रमाभावेन प्रमित्यजनि
कासामञ्जस्यं वा प्रसिद्धं । प्रमितिपदेन भ्रमभिन्नत्वविवक्षणेपि च तन्मते भ्रमाप्र

सिद्ध्याप्रसिद्धिरिति वाच्यं । स्वव्यधिकरणप्रकारत्वानवच्छिन्नविशेष्यताशाल्यनुभव
त्वस्य प्रमितिपदेन विवक्षणात् ॥ तादृशी च स्मृतिसामग्र्येव प्रसिद्धा । अथानुभ
वस्य स्मृतिकारणतया सल्लिंगपरामर्शस्याप्यनेनैव धारणे ज्ञानविशिष्टकारणस
हकारित्वे स्वजन्यज्ञानजनकसंस्कारे ज्ञानविशिष्टत्वस्य वैयर्थ्यमिति चेन्न । करणतातिरि
क्तज्ञानजनकताश्रयकारणतावच्छेदकस्यैव ज्ञानजनकसामग्रीपदेन विवक्षितत्वात्
। अन्यथा स्वात्मककूटलिंगकानुमितिस्थानाभिषिक्तसाध्यस्मृतिमादाय स्मृतिसा
मग्र्यप्रविष्टत्वस्य व्याप्तावप्यसत्त्वेन दृष्टान्तासिद्ध्याद्यापत्तेः । एवं ज्ञानत्वावच्छि
न्नं वा करणत्वेऽपि करणतातिरिक्तेत्यस्य न वैयर्थ्यं विशेषमात्रस्यैव स्वात्मककूटलिंगका
१५ नुमितिस्थानाभिषिक्तसाध्यस्मृतिजनकतया प्रसिद्धिवारकत्वाच्च । जनकताक
रणतान्यतराधारत्वस्य जनकतात्वस्यैकस्याभावाद्विशिष्यैव निवेशे करणताभिन्न १५
जनकतात्वेनैव निवेशः करणतातिरिक्तजनकतात्वेन प्रवेश इति व्यर्थत्वशंका

या अनवकाशात् । उद्बोधकव्यापारता च स्मृतिजनकतानिवेशनीयः उद्बोधकतया जनकता
मादाय प्रसिद्धिः ॥ प्रागभावस्य तत्तद्व्यक्तित्वेन हेतुत्वाच्च न प्रमानुमितिप्रागभावे व्यभि
चार इति दिक् । केचित्तु इष्टप्रकारकविषयवैशिष्ट्यावगाहिज्ञानमेव प्रकृते प्रमितिश
ब्दार्थ इत्याहुः ॥ अथवा ज्ञायमानकरणत्वं चाधेयत्वसंसर्गेण सम्यगर्थः । तथा च यत्र यद्धर्मा
नीयज्ञायमानकरणनिष्ठत्वेऽसति यज्ज्ञानेऽप्रयोगित्वे सति व्यभिचारिवैलक्षण्यं भ
वति तत्तज्ज्ञाननिरूपितज्ञाननिष्ठकारणतायां विषयतासंबंधेनावच्छेदकं भव
तीति व्याप्त्यर्थः । सल्लिंगपरामर्शकज्ञायमानकरणधूमादिनिष्ठः । अथाभासलिंगका
नुमितिं प्रति ज्ञायमानकरणे आलोकनिष्ठत्वस्यादृष्टत्वेन तद्वारणमिति चेन्न । न तद्ज्ञानाधि
करणत्वस्य ज्ञायमानकरणे निवेशात् ॥ अत एव प्रागभावस्य तत्तद्व्यक्तित्वेन हेतु
त्वेऽपि न प्रमानुमितिप्रागभावे व्यभिचारः । धूमनिष्ठानौपाधिकत्वादिवारणाय ज्ञा
नोपयोगित्वे सतीति । बाधाभावादिवारणाय व्यभिचारिवैलक्षण्यादिति ॥

तदर्थस्मृत्या सव्यापारत्वं भ्रमजनकभिन्नत्वमितियावत्। वक्तृमात्रस्यैव लिंगविधया भ्र-
मजनकतया। ज्ञायमानलिंगस्यातिरिक्तरूपेण भ्रमजनकभिन्नत्वं विवक्षणीयं।
नचतन्मतेतदप्रसिद्धिः विसंवादिप्रवृत्त्यादिजनकज्ञानमात्रस्यैव तन्मते तथाभावात्
नचाबाधितत्वादितयाबाधस्य विपरीतनिश्चयस्य सद्भावेनज्ञानस्याभावेन तदभा-
वस्यज्ञानमात्रप्रयोजकत्वादिति। ननुतन्मतेऽग्रहीतसंसर्गकग्रहणस्मरणभ्र-
ज्ञानद्वयस्यैव भ्रमतया विसंवादिप्रवृत्तिजनकत्वेन तस्यच निर्द्धर्मितावच्छेदकतया बाधा-
भावस्य न तत्र हेतुत्वमिति कथमेतत्। अत्र केचित्। विसंवादिप्रवृत्तिजनकत्वेन ज्ञानस्य न
ले प्रवेशः अपितु स्मृतित्वेन तथाच स्मृतिजनकतावच्छेदकावच्छिन्नान्यत्वादितितदर्थः। जनक-
१६ ताघटकीभूतधर्मव्याप्यत्वाज्ञानेनानाप्रसिद्धिरिति। असंसर्गाग्रहविशिष्टज्ञानद्वयेऽन्वयव्यतिरेका-
भ्यां बाधस्य विरोधित्वमिष्यत एवेत्यपि केचिदित्तिदिक्। तत्र तात्पर्यं सामान्यतः तत्तत्प- १६
दार्थत्वेन रूपेण तत्तत्पदार्थविशिष्टघटितं विशिष्य तत्तत्पदार्थघटितं च। तत्र च वेदस्थले

ध्य ती
कघटपदार्थप्रकारकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानं हेतुः न तु विशिष्य लोके घ-
टविषयकमिता विशेष्यकघटप्रकारकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानमेव हेतुः तत्र
सामान्यतः घटपदार्थत्वादिना तात्पर्यग्रहेऽपि पटादेरपि लक्षणादीनां घटपदार्थत्वसं-
भवे घटविशिष्टकर्मता विशेष्यकप्रतीतीच्छयोच्चरितत्वं न वेति विशिष्यसंदेहेऽपि शा-
ब्दबोधापत्तेः वेदे लक्षणादिनानार्थसंभवेन एकपदार्थत्वेन ज्ञानेऽपि विशिष्य
संदेहाभावात्। यथा कपिंजलानालभेतेत्यादौ प्रथमोपस्थितत्वरूपलाघवतर्के
निर्णीते त्रित्वविशिष्टकपिंजलपदार्थपरं बहुवचनांतं कपिंजलपदमिति
सामान्यतः कपिंजलपदार्थ~~परं बहुवचनांतं~~त्वरूपेण तात्पर्यनिर्णयेऽपि विशिष्य
कपिंजलत्वादिरूपेण तात्पर्यसंशयासंभवात्। लोके गुरुभूते पर्वते तात्पर्य
संभवेन लाघवतर्कानवतारात् विशिष्यसंदेहसंभवेन घटविशिष्टकर्मत्ववि-
शिष्टे घटप्रकारकप्रतीतीच्छयोच्चरितमिदमिति तात्पर्यनिर्णयस्यशाब्द
द्ध

वेधात्सर्वमिवस्यापेक्षितत्वाल्लौकिकवाक्यमनुवादकं न स्यात् अलौकिकवाक्यं सर्वमेवा
नुवादकत्वादप्रमाणं॥वेदेऽप्येतदेव वाक्यमात्रस्य किंतु पुंवदस्तु॥ एकपदार्थ
विशिष्टपरपदार्थविशेष्यकएकपदार्थप्रकारकप्रतीतिच्छयोश्चरीतत्वरूपयथा
र्थतात्पर्यनिश्चयत्वेन हेतुत्वेऽयाथार्थ्यनिवेशे गौरवात् किं त्वनाप्तानुरोधेन शा
ब्दसामान्ये एकपदार्थप्रकारकापरपदार्थविशेष्यप्रतीतीच्छयोच्चरितत्वरूप
आप — तात्पर्यज्ञानस्यैव॥ न चैवं करकाभिप्रयुक्तपयस्याशिंचनीत्ययोग्यवाक्येऽपि — ८५
प्रमापत्तिरित्युक्तमिति वाच्यं॥ एकपदार्थे परपदार्थवत्त्वरूपयोग्यताप्रमाया एव
१७ — संशयनिश्चयसाधारणरूपेण कारणत्वात्॥ अपि च रुद्दे वाक्यं। भ्रमादिविशिष्टज्ञा — १७
नयोरन्यतरजन्यं वाक्यार्थज्ञानजन्यवाक्यत्वात्॥ अपि च। ततश्च भ्रमादेर्बाधेऽप्र
यंक्त्रासमुक्तवाक्यार्थगोचरयथार्थज्ञानवान् भ्रमाजन्यवाक्यार्थज्ञानजन्यवा
घ समयोक्त्वा
२

==अत्र पतितं पत्रं

घटपदार्थविशिष्टाकूपदार्थविशेष्यं दहमिवेति वक्तुर्यथार्थवाक्यार्थज्ञानानुमानं सर्वत्र ए
व यथार्थवाक्यार्थप्रतीतिः। परन्तु निश्चयो हेतुर्वीस्त्वव्यवस्थानसंभवति। भ्रांते पुरुषधर्मत्वे
न भ्रमाद्यजन्यत्वनिर्णयासंभवात्॥ संवादिप्रवृत्तिजनकतादृश्यतज्ज्ञानत्वरूपलिंगस्पर्श
ब्दबोधोत्तरकालीनत्वादित्यास्तां विस्तरः॥ ननु शाब्दस्यानुमानान्तर्गतत्वे घटमा
नयेति शब्दात् घटादिपदेशक्तिमविदुषोऽपि शाब्दबोधापत्तिः। मम तु तत्र व्याप्तिज्ञानाभा
वादेव तदसंभवः स्यादित्याशयेनाशंकते। नचेति। स्यादित्यन्तेन। शब्दत्वेन पामराणां घटादिपदे
गृहीतशक्तिकानां। सहकारित्वादिति॥ ज्ञानं तरकारणचक्रसममेव हिन कारणस्यैव फलोप
धायकत्वेन केवलशब्दस्यत्वेऽपि शक्तिज्ञानरूपसहकारिविरहात् न तस्य फलोपधायक
मितिभावः। अपोद्धानसंगत्याशक्तिं निरूपयितुमाशंकते। अथेति। इयं शब्दसहकारिग्रहवि
षयः पदार्थान्तरमिति॥ तत्तत्पदार्थतावच्छेदकान्तावान्। कूटवदित्यर्थः। तेनैं सिद्धासि

द्विव्याघातः संकेतयोर्हि वृद्धमाणस्संकेतजन्यप्रयत्नविषय इत्यर्थः आवश्यकत्वात्॥
अभिधाज्ञाने नवतामप्यपेक्षणीयत्वात्। संकेतं निरूपयति। सचेति॥ अस्मादिति॥
एतत्पदजन्यत्वप्रकारतानिरूपितएतदर्थबोधत्वविशेष्यता॥ शाब्दीच्छेत्यर्थः। हंतेवमि
ति॥ एवं इच्छामात्रस्य वे अभिधास्वरूपत्वे॥ पामरादीति। गार्ग्येत्यादिशब्दा इत्यर्थः॥ अ
भिधासंबंधस्य स्मरितितथावनाप्रत्वेक्षित वेदेन्नोछित्तये इत्यादिश्रुति विरोधः शक्यप्रती
पादकत्वस्यापभ्रंशानपभ्रंशसाधारणत्वात्। अतिरिक्तशक्तिस्वीकारे तु तत्र संकेतसत्वे
पि अतिरिक्ताभिधस्य तस्यानंगीकारात्॥ न तादृशश्रुतिविरोध इति भावः। संकेतमात्रं॥
१७ ताऽदृशेच्छामात्रं अपभाषिते गर्ग्यादिशब्दे। सोऽस्ति। ईश्वरसंकेतोऽस्ति। मानाभावादिति
शास्त्रनिष्णातबुद्धिर्नो गर्ग्यादिशब्देऽर्। शाब्दरूपफलाभावेनापभ्रंशेन ताऽदृशेश्वरसंके
त इत्यर्थः॥ नापभ्रंशेन वेदस्तिश्रुति विरोधश्च बाधकोऽवसेयः। ननु शब्दसामान्ये श १७
क्तिज्ञानस्य हेतुत्वपापभाषिते शाब्दाभावे कथं शाब्दबोध इतिन्नरस्कः संकेतेष्पं तर्हि
२

ति॥ शक्तिभ्रमादिति। भ्रमप्रमासाधारणशक्तिज्ञानत्वेन हेतुत्वादिति भावः॥ ननु प्र
मेयत्वादिना शक्तिज्ञानेऽपि शाब्दबोधानुदयात् शक्तित्वेन तज्ज्ञानं हेतुः शक्तित्वं च
तदृशेश्वरसंकेतत्वं॥ तथा च पामराणामीश्वराज्ञानात् संकेतस्येश्वरसंकेतत्वेनाज्ञानात्
कथं शाब्दबोधस्तत्र संकेते। कथं तत्र इति॥ ईश्वरमविदुषामिति। पामराणां मीमांस
कानां चेश्वुपेनयत्रान्वेति। तथेति। संकेतत्वेनेत्यर्थः। तेषामपि संकेतत्वप्रकारक
ज्ञानसत्वादिति भावः। चैत्रशब्दादयमर्थो बोद्धव्य इत्यास्माकीनेच्छाविषयाणां चैत्रा
दिशब्दानामशक्तत्वापत्तिः। तच्चेश्वरसंकेते मानाभावादित्याशंक्य तेष्वाधुनिकेति॥ का
णातिरिति॥ तच्चेश्वरेच्छारूपसंकेतज्ञानताभावादिति भावः॥ तस्यापि आधुनिक
संकेतितेचैत्रादिशब्दस्यापि। ईश्वरेति। द्वादशाहःप्राप्तीन पितुर्करीत नामत्वादि
नानामवाच्यः। शिष्टाचारितत्वाकारकेच्छयेश्वरेण ताऽदृशश्रुतिद्वारेण यनात्द तत्रापि।

नेत्यतिस्यादित्यर्थः। तस्य च गोसदृश इति वाक्यार्थज्ञानस्य शक्तिग्रह ६
धरसंकेतोस्तीतिभावः॥ ईश्वरीयज्ञानस्य इच्छारूपत्वे वा शक्तिरूपत्वमिति विनिगमनाविर
हाद् अतिरिक्तैव शक्तिरितिभावः। संकेतग्राहकप्रमाणाभावेन संकेतग्रहासंभवान्न
कथं शक्तिज्ञानं हेतुरित्याशंकां तस्याद्येतदिति। कथं यत्र घः केन प्रमाणेन ग्राह्यः। अ
तेउपमानादित्याह। तस्य च गति देशवाक्यार्थज्ञानरूपोपमानस्य वाक्यार्थज्ञानमिति
द्रशो गोसदृशो गवयपदवाच्य इत्यति। देशवाक्यार्थज्ञानं तावच्छब्दं तद्गोसदृश इति वं
ज्वाक्यार्थज्ञानस्य शक्तिग्रहहेतुत्वात्। गोपदं गवि शक्तमिति शक्तिज्ञानसत्त्व
त्वादित्यर्थः॥ तथा च तच्छक्तेरप्युपमानान्तरात् ग्रहे ऽनवस्थापत्तिरिति भावः। व्यवहा
१८ रादिति। प्रयोज्यप्रयोजकवृद्धव्यवहारादित्यर्थः। व्यवहारश्च घटानयनादिक्रियारू
पः॥ केनचित्प्रयोजकवृद्धेन कश्चन प्रयोज्यवृद्धः॥ तदर्थः प्रयोजकवृद्धवाक्यार्थः। घट
मानयति॥ घटानयनानुकूलचेष्टावान् भवति। तथा क्रियया। घटानयनक्रियया १८
तस्य प्रयोज्यवृद्धस्य प्रयत्नमिति। इयं पत्रद्वितीयाविधा क्रिया चानु॥॥ ॥

शानजन्यत्व निश्चयात्

मक्रियावदित्यनुमिनोतीत्यर्थः॥ ज्ञानं घटानयनगोचरं ज्ञानं॥ अयं घटानयनगोचरप्र
यत्नं घटानयनज्ञानजन्यः॥ घटानयनगोचरप्रयत्नत्वात् स्वीयस्तनपानगोचरप्रयत्नवत्
योयद्गोचरप्रयत्नः स तद्ज्ञानजन्य इति सामान्यमुखीव्याप्तिरतो न दृष्टान्तासंगतिरिति
दृष्टांतमेवाह। स्वयत्नेइति॥ स्वीयस्तनपानगोचरयत्नेत्यर्थः। तेन। वाक्येन। तथानिश्चयात्।
तद्वाक्यज्ञाय॥ घटानयनगोचरज्ञानहेतुवाक्यार्थज्ञाया। शब्दमेव घटमानयेति शब्दमेव॥
आवापोद्वापाभ्यामिति॥ आवापः संग्रहः। उद्वापः त्यागः। यथा घटमानय पटमानयेत्यादि॥ त्या
कस्मिंश्चित्तस्मिन्निति। घटपदे घटधीजनकत्वे कस्मिंश्चेत्यर्थः। अतिप्रसंगभंगाय घटपदं
घटधीजनकमिव पटधीजनकमपि स्यादित्यतिप्रसंगभंगायेत्यर्थः। वस्तुतस्तु अतिप्रसं
गभंगाय अग्रहीतशक्तिकानामपि घटशाब्दबोधातिप्रसंगभंगायेत्यर्थः। तज्जननानुकू
लं घटधीजननानुकूलं। किमनुपपन्नमिति। तदर्थविषयकशाब्दत्वावच्छिन्नं प्रतिज्ञाय
मानतच्छक्तपदत्वेन कारणत्वान्नातिप्रसंग इति भावः। नन्वेवं व्यवहारएव शक्तिग्राह

कृदन्याया वे इत्थं च शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेष
द्विवृतेर्वदन्ति सान्निध्यतः। सिद्धपदस्य वृद्धा इति प्राचीनगाथाविरोध इत्यत आह॥ तद
नन्तरमिति। आद्यशक्तिग्रहानन्तरमित्यर्थः। व्यवहारात् घटानयनगोचरप्रयोज्यप्रयो
जकवृद्धव्यवहारात्। एवं च घटानयनगोचरव्यवहार उक्त इति नाभेदः। अनवस्था
भियापूर्वं व्यवहार एव शक्तिग्राहकः। ततश्च व्यवहारेणोपमानेन वा शक्तिग्रहो जा
यत इत्यत्र नास्माकमाग्रह इति न प्राचीनगाथाविरोध इति भावः। उपमानादिति। गो
सदृशो गवयपदवाच्य इत्युपमानात्। गवयो गवयपदवाच्य इति शक्तिग्रहः स्यादित्यर्थः॥
शब्दादिति। आप्तवाक्यादित्यर्थः। कोकिलः पिकपदवाच्य इत्याप्तवाक्यात् पिकपदा
देः कोकिले शक्तिग्रहादिति भावः। व्याकरणादिति। प्रकृतिप्रत्ययादीनां शक्तिग्रहो
१९ व्याकरणादित्यर्थः। कोशादेरिति। अथैकदन्तहेरम्बलम्बोदरगजाननाः इत्यत्र गणेश १९
त्वविशिष्टे शक्तिग्रह इत्यर्थः। नन्वत्र गणेशत्वविशिष्टस्यापदार्थतया पदार्थस्य प

दार्थतावच्छेदकस्य वा भेदाभावाच्च कथं बोध इति चेन्न। कोशस्य शक्तिग्राहकत्वे तया इदमत्र
शक्यमिति शक्तिग्रहस्यैव तस्मादुदयेन तत्र पदानामेव पदार्थतयाऽभेदसत्त्वात्।
आदिपदग्राह्यशेषविवरणप्रसिद्धपदसमानाधिकरणपरिग्रहः। वाक्यशेषात्
यथा॥ यवमयश्चरुर्भवतीत्यत्र यवशब्दः क्वचित्प्रसिद्धिवशात् कङ्गौ कीचकुः आर्यैर्व्य
वहारदर्शनात् दीर्घशूकविशिष्टस्य वा व्यवहारसौयित्रा विशेषान्न इति संदेहे वस
ति सर्वसस्यानां जायते पत्रशातनं मोदमानाश्च। इत्यर्थे यवाः कणिशशालिन इति वाक्य
शेषात् दीर्घशूकविशिष्टे शक्तिनिर्णयः। न च वेदे न दीर्घशूकविशिष्टे शक्तिबोध
नेऽपि कंग्वादौ शक्तित्वे बाधकाभावः। नानार्थत्वेनापि वेदोपपत्तेरिति वाच्यम्। अ
न्याय्यश्चानेकार्थत्वमिति न्यायेन वेदस्य बहुवचनात्। तत्रैव शक्तिपरिच्छेदात्।
एवं यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरं अभिलाषोपनीतं च तत्सुखं स्वःपदा

स्यदनित्यत्ववेद्यादेवशक्तिमहः॥ ननु दुःखासंभिन्नत्वं न दुःखासमानाधिकरणत्वं॥
आद्यावंतेच दुःखासत्वेनासंभवात्॥ नापि दुःखासमानकालीनत्वं॥ अस्मदादिसु
खेपि तथात्वात्॥ न च मरणोत्तरमित्यस्याविरलजन्मप्रवाहीन्यर्थकतया॥ अविरलजन्म
प्रवाहस्य दुःखासंभिन्नत्वे प्रामाण्यानतिव्याप्तिरिति वाच्यं॥ अस्मदादिसुखस्यापि कति
पयक्षणावच्छेदेन तथात्वसंभवात्॥ चक्रवर्तिसुखे तथात्वसंभवेन अभिलाषोपनी
तमित्यनेनापि तन्निरासासंभवात्॥ अन्यथा विशेषणं तरवैयर्थ्यापत्तिरिति चेत्॥ अ
त्र केचित्॥ एकजन्मावच्छेदेन दुःखासंभिन्नत्वादिकं नानैकशक्यतावच्छेदकमित्या
हुः॥ अपरे तु दुःखासंभिन्नत्वादिकं॥ तन्न॥ नानार्थत्वकल्पने गौरवात्॥ तथा नान्य
20 यग्राहकस्याभावाच्च॥ केचित्तु॥ यावत्तिन वैयर्थ्यं तदेवशक्यतावच्छेदकमित्याहुः॥ अप
रे तु॥ दुःखासंभिन्नत्वादिकं न शक्यतावच्छेदकं किं त्वधर्माजन्यशरीरजन्यसुख 20
त्वोपलक्षितमिदं योगिनां तु नाधर्माजन्यंशरीरं तन्न दुःखोत्पत्तेः

मात्रा

रधर्मजन्यत्वात्सुखत्वं च छेदके तत्र शरीरे मानाभावात्॥ अथ मरणस्य दुःखनि
यतत्वात् स्वर्गिशरीरेपि मरणजन्यदुःखसंभवादसंभवः॥ न च तेन रागः सु
खकृत्यकल्पने न विरोधः॥ तस्य दुःखस्यात्वपरत्वादिति चेन्न॥ अनुकूल
तर्काभावे॥ न मरणस्य दुःखनियतत्वे मानाभावात्॥ भावे वा मरणदुःखज
नकाधर्मान्याधर्माजन्यशरीरजन्यसुखत्वस्य प्रवृत्तिनिमित्तत्वात्॥ एतेन स्वर्गवि
पाकतीतस्येतिश्रवणात्॥ स्वर्गयोनिपुण्यक्षयस्य यास्वर्गेपि दुःखोत्पत्ते
रसंभव इति निरस्तं॥ तदन्यत्वेनाप्यधर्मस्य विशेषणीयत्वात्॥ स्वर्गिशरी
रस्य सुखमात्रावच्छेदकत्वेन तत्र दुःखधीर्नोतैव॥ अत एव धर्ममात्रजन्या
केचित्तदविशेषणेपि हृतिविरहरूपाच्छेत्याहुः॥ अविरलप्रवाहरूचि
रस्याथि लिङ्घिच्छामात्रयोग्निदुःखासंभिन्नसुखत्वंशक्यतावच्छेदकं तत्प्रकार

कबोधस्यानुभवसिद्धत्वादित्यपाकुः । आनच अस्त्येवमिति । अयस्तत्वं चिरस्थायित्वं च
वा हस्त्येति बोध्यं । विवरणं यथा । पचति पाकं करोतीति यत्नार्थकं करोतिना सर्वत्राख्या
तविवरणात् । आख्यातस्य यत्नत्वविशिष्टे शक्तिः यद्यपि सर्वं ज्ञातितवाकस्य स्वसमा
नार्थकेनतरोद्धरेत् तवाक्येनार्थकथनरूपविवरणस्य शक्तिग्राहकत्वानशब्दविषया
रू रदमत्रशाब्दे प्रतिशक्तिबोधकपरत्वाभावात् । तथापि आख्यातपदं यत्नत्वविशिष्टे
शक्तं यत्नत्वविशिष्टशक्तकरोतिधातुप्रतिपादितार्थकत्वात् । पाकत्वविशिष्टश
क्तकरोतिधातुप्रतिपादितार्थकत्वात् । पाकत्वविशिष्टशक्तपचधातुप्रतिपादि
तार्थकपाकवत् । यत्र यद्धर्मविशिष्टशक्तप्रतिपादितार्थकं भवति तत्र तद्धर्मविशिष्टशक्तं
२१ भवतीति । सामान्यतुख्यीव्याप्तिश्च यत्र मिनता । इह सहकारतरौ मधुरं पिको रौतीत्य २१
त्र सहकारतरुं पद्ध्यप्रसिद्धपदसमभिव्याहारेणापि कपदं कोकिले शक्तमिति ।
८

प्रसिद्धपदसमभिव्याहारेण शक्तिग्रह इति ध्येयं । ननु कोशस्य शक्तिग्राहकत्वे
गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वतीत्यनेन शुक्लादिपदानां गुणविशिष्टे च
शक्तिप्रतिपादनात् गुणविशिष्टेपि शक्तिः स्यादिति चेन्न । अनन्यलभ्यस्यैव
शब्दार्थतया शुक्लादिपदानां गुणविशिष्टे लक्षणयैवोपपत्तौ न तत्र शक्तिः क
ल्पते । असति बाधके एव कोशस्य शक्तिग्राहकत्वात् । अत एव व्याकरणेना
ख्याततस्य कर्तरि शक्तिप्रतिपादनेपि लाघवात् कृतावेव शक्तिरिति वक्ष्यते ॥
इति दिक् तयोः प्रयोज्यप्रयोजकवृद्धयोः परस्परताबालेन अन्ययोः स्वपूर्ववृद्धी
न प्रयोज्यप्रयोजकवृद्धयोः अनवस्थेति । तयोर्व्यवहारोपपन्नान्यव्यवहारह
र्वक एवेत्यनवस्थापत्तेरित्यर्थः । इयं अनवस्था बीजांकुरवत् अनाद्यनवस्थानं
दोषाय प्रामाणिकत्वादिति भावः । तदसंभवादिति । तत्राद्योत्पन्नबालस्य स्वपूर्व
वृद्धानां प्रयोज्यप्रयोजकवृद्धव्यवहारादर्शनाच्छक्तिग्रहासंभवादित्यर्थः ॥ ॥

ननु संसारस्यानादित्वात् खंडप्रलयाद्यभावेन सर्गाद्यभावात् कथं तदसंभवस्याशं
कते॥ प्रलय इति॥ खंडप्रलयस्येत्यर्थः॥ कार्यद्रव्येति॥ स्वाश्रयकालवारणाय कार्यद्रव्यानधिक
रणेति॥ कालिकसंबंधेन चानधिकरणत्वं बोध्यं। कार्यानधिकरणे तु काशसंभवः। खंड
प्रलयेपि कार्यद्रव्यानधिकरणे तु कौमत्ता प्रलयेऽतिव्याप्तिरतः कार्याधिकरणेति
कार्यत्वं चात्र ध्वंसप्रतियोगित्वं॥ तेन महाप्रलये ध्वंसस्वरूपकार्याधिकरणत्वेपि नाति
व्याप्तिः॥ अभावातिरिक्तकार्यपरं कार्यपदं सामान्यपदस्य विशेषपरत्वादित्यपि
कश्चित्॥ महाप्रलयस्य चरमदुःखप्रागभावध्वंसादिरूपतया प्रतियोगितासंबंधेन
कार्याधिकरणत्वात्॥ कालेति॥ कालिकसंबंधेनाधिकरणत्वबोधकं भिन्नकालीन
योर्नाधाराधेयभाव इति भावः॥ वस्तुतस्तु शब्दादिरूपकार्याधिकरणत्वाद्गगनेति
२२ व्याप्तिरतः॥ कालेति॥ अगमेति॥ धातायथापूर्वमकल्पयत् इतिवेदसिद्धत्वात् महाप्रलयः॥ २२
तथा च संसारस्य प्रवाहानादित्वेन त्वनादित्वमेवेति भावः॥ कालचक्रपाकान्यान्यावृ

त्तिर्घटप्रागभावः॥ कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिरभावत्वात्॥ गगनवृत्ति
घटात्यन्ताभाववत्॥ पदधर्मताबलाच्च प्रागभावे ईदृशकालवृत्तित्वं सिध्यत् खंडप्र
लयवृत्तित्वमादाय पर्यवस्यतीत्यनुमानमपि तत्साधकं बोध्यं॥ शरीरद्वयं प्रयोज्यप्रयो
जकवृद्धशरीरद्वयं। तथापूर्ववत्॥ संकेतं घटपदाद्यसंकेतं॥ नन्वेवं संभवतीश्वरे मानमसंके
तदेव जनेत्याशंक्य तेश्वरएवेति॥ व्यवहारइति॥ शक्तिग्रहकाभावाद्यन्य ऐघटादिगो स५
परघटत्वनुपपत्तिरेवेश्वरे मानमित्यर्थः॥ यद्यप्यर्थापत्तेर्नास्मन्मते प्रमाणांतरत्वं तथापि
न सर्गाद्यकालीनशक्तिग्रहः प्रयोज्यप्रयोजकवृद्धव्यवहारप्रयोज्यः॥ प्रयोज्यप्रयोजकवृद्ध
व्यवहारान्याप्रयोज्यत्वे सति प्रयोज्यत्वात्॥ यन्नैवं यथा गगनादीति व्यतिरेक्यनुमान र
मेव तदानीमन्यवृद्धासंभवादीश्वरसाधकमिति हृदयं॥ मन्वादय इति॥ तथा च नेश्व
रसिद्धिरिति भावः॥ यद्यप्येतावतापि न संकेतग्रहानुपपत्तिस्तथापि प्रसंगादीश्वरोपि साध्य
त इति भावः॥ तेषामिति॥ कपिलमन्वादीनां सर्वज्ञत्वेन वृद्धव्यवहारहेतुत्वे परं जन्येषां

तत्र एव विवाद इति भावः॥ नन्वव्यवहारान्यथानुपपत्तिर्नवन्मते ईश्वरस्यैव मन्वन्तरेऽपि तेषु
सर्वज्ञत्वे एवमाने स्यात्॥ धर्मिकल्पनातो धर्मकल्पना या लघीयस्त्वं चेत्याह॥ व्यवहारेति॥
एवमपि पूर्वसर्गसिद्धसर्वज्ञत्वकुम्भकारादिस्वीकारेऽपि अनुपपत्तेरिति॥ पूर्वसर्गीति॥ पूर्वसर्ग
सिद्धसर्वज्ञत्वकः कश्चिद्यदि स्यात्तदा ततः॥ तत्र व्यवहारप्रवर्त्तना स्यात्। स एव चेन्नास्तीति
भावः॥ तत्रापि पूर्वसर्गेऽपि अन्य एवेति॥ स्वपूर्वसर्गसिद्धसर्वज्ञत्वकः अन्य एवेत्यर्थः॥ तथा ना मा १
वः व्यवहारप्रवर्त्तकत्वं॥ ननु सर्वदा सर्वज्ञत्वादिशाली एको मनुरेव सर्वत्र हेतुमित्याशंक्यते।
अस्त्वेक एवेति॥ स एक एवेति॥ सर्वज्ञत्वादिशालीमनुत्वेन न वदन्ति मतं इत्यर्थः॥ तथा च
नाम निभेदो न तु नाम्नि नि भावः॥ द्विगिति स्वोपादानगोचरजन्यापरोक्षज्ञानचिकीर्षा
कृतिजन्या निजन्यानि स हस्वत्वे कार्यत्वाद्घटवदित्यनुमानमपीश्वरसाधकमवसेयं॥
२२ ननु शाब्दबोधे शक्तिज्ञानस्य हेतुत्वेऽपि घटपदं घटे शक्तमिति शक्तिज्ञानकाले पटशाब्दबो
धापत्तिः॥ न च तदा घटशाब्दबोधोत्पत्त्या शाब्दत्वावच्छिन्नं जायत एव घटशाब्दत्वावच्छिन्न २२
स्यत्वापादकाभाव एवेति वाच्यं। योग्यताज्ञानादेरेव तद्वच्छिन्नापकत्वादित्याशंक्यते॥

श्री।ए४

स्यादेतदिति॥ ननु तद्घटविषयकशाब्दत्वावच्छिन्नं प्रति तत्तत्पदज्ञानत्वेन हेतुत्वकल्पनान्यो
न्याभपत्तिरित्याशंकते॥ अथेति। देशान्तरस्थस्य पुंसः। तस्यामेव (का)शीस्थगोरेव अप्रतीतेरिति
असंनिकृष्टत्वादिति भावः॥ गौः काशीस्थेति रिति वाक्यजन्यबोधे काशीस्थगौरेव विशेष्या एवं
च देशान्तरीय पुंसः। तादृश गोरसंनिकृष्टत्वेन तत्र शक्तेरग्रहात् शाब्दबोधानुपपत्तिरिति तद्वि
शेष्य शाब्दत्वावच्छिन्नं प्रति तद्विशेष्यकशक्तिग्रहत्वेन कारणता दुर्वचेति शाब्दत्वे शक्तिज्ञानत्वा
भ्यामेव कार्यकारणभावो वाच्यः॥ योग्यताबलाद्वा गृहीतशक्तिकव्यक्तेरपि नानुपेयं। एवं च घ
टपदात्तदशाब्दबोधापत्तिर्जागरूकैवेत्यनुपपत्त्या शाब्दप्रमितिरनुमित्यन्तर्गतैव॥ एवं च घटप
दात्पटशाब्दबोधापत्तिः॥ तन्निरूपितव्याप्तिज्ञानादेरभावादित्याखंडनभावार्थोऽवसेयः॥ अ
त्र शाब्दत्वशक्तिज्ञानत्वाभ्यां कार्यकारणभावविचारे गोत्व एवेति॥ गोत्वविशिष्टशक्तिस्वीकारे अव
च्छेदकत्वात्॥ नागृहीतविशेषणन्यायेन गोत्व एव शक्तिः। विशिष्टशक्तिस्वीकारमपेक्ष्य विशे
षणशक्तिस्वीकारे लाघवात्॥ तदिदमुक्तं। विशेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति॥

कथं तत्रेति। व्यक्तेरशाब्दत्वेऽत्यर्थः॥ लाभः बोधविषयता। अशाब्दस्यापि शाब्दबोधविषयत्वोपग
मे पदादेरपि बोधधापत्तेरिति भावः॥ ननु आक्षेपो अनुमानं तच्चेन संभवति। साध्यहेतुप्रयोगा
नसंभवात्। तथा हि। अयं गौः गोत्वादिति तावत् अनुमानमसंभवि शाब्दात्तपदोत्थानात्। नापि गो
त्वेन गवाश्रितं गोत्वत्वादिति। पदेऽतो वच्छेदकहेतो तैकेन सिद्धसाधनात्। अथ गोत्वं व्यक्त्याश्रितं
गोत्वत्वादिति चेत् पदेऽतावच्छेदकं॥ जातित्वादित्यनुमाने न पक्षधर्मता बलात् तदाश्रयव्यक्ति
सिद्धिरिति चेन्न॥ जातित्वादेर्लिंगस्य पदादनुपस्थितेः व्याप्त्यादिप्रतिसंधानमंतरापि व्यक्तिबोध
स्यानुभवसिद्धत्वाच्चेति कथमाक्षेपादेव व्यक्तिलाभ इत्याशयेनाशंकते। ननु कोऽयमाक्षेप इति। समाध
त्तेऽस्येति॥ गवादिधर्मिण इत्यर्थः॥ अर्थापत्तिमेवाह॥ गोत्वमिति। अनुपपन्नमिति॥ आनयनाद्य
न्वयेनानुपपन्नमित्यर्थः॥ तेनाश्रयं। आक्षिप्य प्रतीति। अनुपपत्तिज्ञानजन्यार्थापत्त्यात्मकरूपेण व्याप्त्या
दिज्ञानस्यानपेक्षितत्वादिति॥ अत एव शतवर्षजीवी देवदत्तो गृहे नाव बहिः सत्त्वं विना अनुपपन्नमित्यनु २४
पपत्तिज्ञानात् व्याधिकरणेनापि शतवर्षजीवित्वगृहाभावेन बहिःसत्त्वसिद्धिरिति भावः॥ २४
तथा च गोशब्दाद्गोत्वस्य शाब्दबोधः व्यक्तेस्तु अनुमितिविषयत्वं अर्थापत्तिविषयत्वं वा न तु

चेति गौरवमिति वाच्यं गोपदस्य जातिमात्रवाचकत्वेऽपि प्रत्युत आपत्ते
तीतेरप्यपि अ
शाब्दबोधे तस्याः प्रवेशः॥ भट्टमते पदोपस्थिता एव शाब्दबोधे भासंते यथा गामानयेत्यादौ
पदानुपस्थिता एव वा यथा॥ पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः॥ खुरविक्षेपशब्दं च श्वेतो
ऽश्वो धावतीति धीरित्यत्र पदानुपस्थितानामेव शाब्दबोधे विषयता न त्वशाब्दत्वमित्यनुभवा
त् न तु केचित् पदोपस्थिताः केचिच्च पदानुपस्थिता इति॥ अर्धजरतीन्यायस्य भट्टैरनंगीकारात्।
न च गौरिति पदात् युगपदेव जातिव्यक्त्योः प्रतीतिः यौगपद्येन एवं गौः पदाद्गोत्वधीः ततः अ
नुपपत्तिज्ञानं ततः व्यक्तिधीरिति ज्ञानधारावत् स्यान्नैतत् चक्षुःसुखत्वेन दोषसात्। यथा पच
तीत्यत्र कर्तृमात्रशाक्तोऽरव्याते न कृतिमात्रप्रतीतिः कर्तुर्निरूक्तआक्षेपादेव अन्यथा सकर्तृकक्रि
यायाएवावगते आख्यातस्यापि कर्तरि शक्तिः प्रसज्येत अन्यलभ्यत्वात् च न शक्तिरिति चेत् तत्रापि
अन्यलभ्यत्वादिति ध्येयं। अनुपपत्तिरिति। गामानयेत्यादौ गोत्वस्यानयनेऽन्वयानुपपत्त्या व्यक्तेराक्षे
पसंभवेऽपि गौरस्तीत्यत्र गोत्वस्य नित्यत्वेऽन्वयसंभवेन अनुपपत्तिज्ञानस्यैवासंभवित्वात्
तदनुपपत्तेन तेन व्यक्तेर्लाभासंभव इत्यर्थः। न तु अनुपपत्तिज्ञानं विनापि व्यक्तिबोधस्यानुभावत्व
तया तदनुपपन्नेरित्यर्थः। तथा सतीपचतीत्यत्रापि आरव्यातस्य कर्तरि शक्त्यापत्तेः अनुभवस्य
५

तत्राच यथायंसः पुष्ठे पत्न। नांश्र तत्पर्यावितस्यार्थबोधकत्वानियमात्।इति
त्यत्वात्।अत एव गामानयेतिविहाय गौरस्तीत्येवोक्तमिति। चिंतामणिवृत्ते स्तु।। व्यक्तेरपदा
र्थत्वेसुवर्थसंख्याद्यनोकर्तव्ये वान्वयात्सु त्वनिदेशः।जातावेवशक्तिस्वीकारेपि पश्वादिपदे
उपाधिविशिष्टव्यक्तौ तैरपिशक्तिस्वीकारेण तत्रैवैतन्नियमावधारणात्।नच प्रकृतिपदता
त्पर्यविषयएवतदन्वयइति नियमइति लक्षणेछिद्रापत्तेः गौरश्वाननुपचतीत्यत्र यथाश्र
द्धेपलभ्येनैवकर्त्रीसंख्यान्वयः तथाआक्षेपलभ्यव्यक्तौपि तदन्वयः स्यात्।। दृशानियमस्यचत
त्रैवात्रापिसंकोचादितिवाच्यं।।तत्रापिचैत्रइतिपदमध्याहृत्यैवान्वयबोधस्वीकारात्।।
तदीदमुक्तं।अयमेवहि।।आक्षेपीयत् प्रथमान्तपदोपस्थाप्यत्वेनामेति।अस्संकोचेनोप
से पन्नौ गुणः शब्दसंकोचे मानाभावाच्च।।नहीत्रतत्रसंकोचइत्यन्यत्रापि सः व्युत्पत्तिमात्रोच्छेदा
पत्तेरिति।यत्तु गोपदस्य गोत्वेशक्तिः व्यक्तौ लक्षणेति मंडनमिश्राः।तदुक्तं।जातावस्तित्वे
२५ स्तित्वेन हि कश्चिद्विवदेति नित्यत्वाधव्रमाणया वाक्येस्वेह विशेषणेइति उक्तित्वना
त्वेउत्पत्तिविनाशौ गोत्वनः गौर्नष्टइत्यादौ चित्वनित्यत्वेनोत्पादविनाशयोरसंभवात्
कौल्लक्षणा तात्पर्यज्ञानस्य गंगायां घोषमत्स्यौ इत्यत्रेवयुगपद्वृत्तिद्वयविरोधे।

मानाभावादिति।तन्न।।शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा यथा गंगायां घोषइत्यत्र तीर
त्वेन ज्ञाते न तु प्रवाहशक्तिगंगात्वादिति शक्तेन रूपेण ज्ञाता व्यक्तित्वेन सास्नादिमत्त्वेन ज्ञाने च
तेनैव शाब्दबोधापत्तिः।लक्षतावच्छेदकरूपेणैव लक्ष्यस्य भानियमात्।किंच जातिमात्रे श
क्तिः व्यक्तौ लक्षणेति तदास्यात्।यदि जातेर्मात्रे मुख्यः प्रयोगः न चैवं।किंच गां पश्य गौरस्ती
त्यादौ मुख्यार्थान्वयानुपपत्त्यभावेन लक्षणायां मानाभावात् व्यक्तिबोधानुपपत्तिश्चेति ध्येयं
तस्मादिति।।अन्यविधाक्षेपस्यपूर्वं च त्वादित्यर्थः समानेति।एकज्ञानविषयत्वमेवेत्यर्थः इदमेवे
त्यर्थः इदमेवं विशदयति।।यावतीहीति।व्यक्तिप्रसक्ते विनाजातिप्रत्यक्ष <s>...</s> मध्या
दि।तावुन तत्रैव तन्नियमावधारणादित्यर्थः।ननु प्रत्यक्षेत्यक्षस्य केसंयुक्तसमवायादिरूपजा
तिप्रत्यक्षसामग्रीसत्त्वेसंयोगादिरूपव्यक्तिनासत्कस्य सत्वादस्तु तथा शाब्दे कथमेवमित्या
क शंते।इदमेवेति।समानवित्तिविद्यत्वमेवेत्यर्थः।।जातिभानेति।जातिविषयकशाब्दबोधे जाति
शक्तिज्ञानस्य हेतुतया तत्र व्यक्तेजातिशाब्दबोधेजायमानेव्यक्तेरपि नामतेन तत्र शाब्द विषय
कशाब्दबोधेतत्वदनिरूपितजातिशक्तिज्ञानस्य हेतुत्वादित्यर्थः इदं तु गुरुमतेनुमुक्ष्वेशकेसरी

कारेवाच्यं ॥ तथाहि ॥ तन्मते जातौ व्यक्तौ च शक्तिः परंतु जातिविषयकशक्तिज्ञानमेव जातिविशिष्ट
व्यक्तिविषयकशाब्दबोधे कारणं शक्तिस्वरूपसदुपयुज्यते ॥ न च जातिविशिष्टव्यक्तिशाब्दबो
धे व्यक्तिशक्तिज्ञानमेव कारणं जातिशक्तिस्तु स्वरूपसदुपयुज्यत इत्येव किं न स्यादिति वा
च्यं ॥ तथा सति देशांतरस्थगोविशेष्यकशक्तिज्ञानाभावेन तद्बोधानापत्तेः ॥ एवं च घटादिबो
धापत्तिरपि न तत्पदशक्यविषयकशाब्दबोधं प्रति तत्पदनिरूपितजातिशक्तिज्ञानत्वेन का
रणत्वादिति कुब्जशक्तिवादनिष्कर्षः ॥ ननु कुब्जशक्तिवादिमते व्यक्तिशक्तिज्ञानस्याहेतु
तया तत्स्वीकारे प्रयोजनाभावः ॥ न च तथा सति जातिविषयकशाब्दत्वमेव जातिशक्तिज्ञान
कार्यतावच्छेदकं योग्यताबलाद्व्यक्तिरपि भासत इत्येवोपेयं तथा घटादेरपि भानाप
त्तिः ॥ अशक्यत्वाविशेषात् ॥ मन्मते च तत्पदशक्यविषयकशाब्दत्वस्यैव कार्यतावच्छेदकत्वे
२६ अनुपपन्नत्वाभावादिति वाच्यं ॥ जातिप्रकारकव्यक्तिविशेष्यकशाब्दबोधं प्रति जातिविषय २६
कशक्तिज्ञानत्वेन कारणत्वे इति विरहादित्यलं कुब्जशक्तिवादिमतेनेत्यत आह ॥ यद्वेति ॥
तथा चेष्टापत्तिरिति भावः ॥ कुब्जशक्तिवास्त्वेकदेशिमतेनेति न तत्स्वीकारे तेषां सिद्धांत

विरोध इति भावः ॥ जातिशक्तिरेवेत्यत्र एवकारेण व्यक्तौ कुब्जशक्तेः स्वरूपसदुपयोगिच
व्यवच्छेदः ॥ अन्यथात्मा ॥ जातिशक्त्या ॥ अन्यबोधने ॥ तत्पदशक्यव्यक्तिबोधने ॥ अतिप्रसंगः ॥
घटादिबोधनप्रसंगः ॥ तत्पदाशक्यत्वाविशेषात् मन्मते च व्यक्तेरपि तत्पदशक्यतया न व्यक्ति
बोधने कापि क्षतिरिति भावः ॥ उत्तरयति ॥ गोत्वशक्तेमिति ॥ गोत्वप्रकारकगोविशेष्यकशा
ब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन कारणतया न घटादिबोधनापत्तिरित्यर्थः ॥ ननु गोत्वप्रका
रकगोविशेष्यकशाब्दं प्रत्येव गोत्वशक्तिज्ञानस्य कारणत्वमुपेयते ॥ घटत्वप्रकारकघटविशे
ष्यकशाब्दबोधं प्रति तु नेत्यत्र विनिगमकाभावः ॥ अशक्यत्वाविशेषादित्यत आह ॥ शाब्देऽन्यथानु
पपत्तेरिति ॥ गोपदात् गोत्वविशिष्टस्यैव बोधः ॥ न तु घटत्वादिविशिष्टस्येति फलानुपपत्त्येत्य
र्थः ॥ तथैव गोत्वविशिष्टशाब्दबोधं प्रत्येव कल्पनात् ॥ गोत्वशक्तिज्ञानस्य हेतुत्वकल्पनात् ॥ एव
कारेण घटादिशाब्दबोधं प्रति तु न तथा हेतुत्वकल्पनं फलाभावादिति सूचितं ॥ अथवा पूर्वो
क्तकुब्जशक्तिवादिमते दूषणं प्रकाशयति ॥ अन्यथेति ॥ अन्यथा कुब्जशक्तिस्वीकारं व्यक्ति
बोधोपपादने ॥ अनुपपत्त्या उपपत्त्यभावेन व्यक्तौ कुब्जशक्तिस्वीकारे प्रयोजनविरहेणेतन्मते

प्रमाणाभावेनेतियावत्। तथैवगोत्वविशिष्टबोधं प्रत्येवंकल्पनात्। गोत्वशक्तिज्ञानस्य हेतुत्वकल्प
नादित्यर्थः। वस्तुतस्तु जाति। भासकसामग्र्या एव व्यक्तिभासकत्वादिति। अन्ये च जातिशक्ति
रेव व्यक्तिबोधिकेति। ग्रंथपर्यालोचनया कुब्जशक्तिवादमादाय यद्वा पूर्वग्रंथसंगमने गो
त्वपदस्य व्यक्तौ शक्त्यभावेन तथा सतीत्यग्रिमदूषणदानस्य यद्वा पूर्वकल्पे। संभवितया
वनैवं व्याख्येयं। न च यद्वेति निष्कृष्टमते एव तथा सतीति दूषणदानमिति वाच्यं। संदर्भ
शुद्धेरपरिहारात्। किं त्वन्यथैव। तथाहि जातिमानेति। जातिशब्दमेव जातिशक्तिज्ञान
कार्यतावच्छेदकं जातिभानेनायमानेव्यक्तिविषयकत्वं तस्याभावात् व्यक्तिरपि भासते यद्वि
षयेन विना न भासते तद्बोधकस्य तद्बोधकत्वनियमात्। जातिभासकसामग्र्या एव तद्बोधो
पधायकत्वादित्यर्थः। ननु जातिविषयतां विनापि व्यक्तिप्रत्यक्षोदयात् जातिजातिभासक
२७ सामग्र्यतिरिक्ता व्यक्तिभासकसामग्री अवश्यमुपेयमानत्वे शङ्किते तथानियमः। तथापि जाति २७
भासकसामग्र्या व्यक्तिबोधोपधायकत्वे ततो घटादेरपि कुतो न बोधः। न च व्यक्तिबोधे समा
विविवेचत्वमेव नियामकमिति वाच्यं। नहि व्यक्तिबोधे समानवित्तिवेद्यत्वेन कारणता।

तथा च व्यक्तिविषयतायाः कारणनियम्यत्वावश्यकत्वे व्यक्तिशक्तिज्ञानमेव कारणं स्यादित्य
स्वरसादाह यद्वेति। जातिशक्तिरेवेत्येवकारेण व्यक्तिशक्तिव्यवच्छेदः। तथा च। व्यक्तिवि
षयतायाः जातिशक्तिज्ञानकार्यतावच्छेदककोटौ निवेशात् तस्याः कारणनियम्यत्वमि
ति भावः। गोत्वशक्तिज्ञानस्य घटबोधं प्रत्येव हेतुत्वमास्तामित्यत आह। अन्यथेति। गो
पदाज्जातेरेव बोधो न तु घटादेः नो गोशब्दप्रत्येव हेतुत्वकल्पनादित्यर्थः। यद्वा ननु व्यक्तिरेव जातिवि
शिष्टबोधिकेत्येवं किं न स्यात्। न वक्तेति तल्पदशक्यतायाः व्यक्तेरिव मन्मतेऽपि जातेर्भानेबाधकाभा
वादित्यत आह। अन्यथेति। अथवा ननु तत्पदशक्यतायां बोधनेति। प्रसंगात् जातिविशिष्टश
क्तिरेव बोधिकेत्येवास्तामित्यत आह। अन्यथेति। व्यक्तिशक्तिज्ञानद्वारणेचेदेशोपरस्य गोबोधा
नुपगत्वा जातिशक्तिज्ञानत्वेनैव हेतुत्वकल्पनादित्यर्थ इति ध्येयं। तथासतीति जातावेव शक्ति
स्वीकारेण गोत्वविशिष्टविषयकशाब्दं प्रति गोत्वविषयकशक्तिज्ञानत्वेन हेतुत्वस्वीकारे इ
त्यर्थः। गोत्वमस्तीति। गोत्वपदस्यापि गोत्वशक्तत्वेन गोपदगोत्वपदयोरविशेषात्। गोत्ववि
शिष्टशाब्दबोधापत्तेरित्यर्थः। न च गोत्वं गोपदशक्यमितिनिरूढशक्तिनावच्छेदककगोपदशक्ति

ज्ञानं गोत्वविशिष्ट~~शाब्दबोधे~~बोधहेतुः गोत्वत्वधर्मितावच्छेदकगोपदशक्तिज्ञानं गोत्वत्व
रूपेण गोत्वशाब्दे हेतुरिति नातिप्रसंग इति वाच्यं॥ गोत्वेन गोपदं मिति बाधकालेपि नि
ष्ठमितावच्छेदकक शक्तिज्ञानसंभवेन गोत्वविशिष्टशाब्दबोधापत्तिरिति गोत्वत्वधर्मितावच्छेदकता
वच्छेदकक शक्तिज्ञानहेतुताया आवश्यकत्वात्॥ एवं च गोत्वे स्वशक्यतावच्छेदकत्वावश्यकेतया
तद्विपदं गोत्वजातैरेव तथात्वमुचितमित्यपि ज्ञापवमवसेयं॥ अथ गोत्वेन निरवच्छिन्नैव शक्तिः
गोपदं गौरित्याकारकं शक्तिसंबंधेन स्वरूपतः गोत्वप्रकारकगोपदत्वावच्छिन्नविशेष्यक शा
२८ क्तिज्ञानं ~~च गोत्वशाब्दबोधे हेतुरिति न गोत्वे~~ गोत्वविशिष्टहेतुरिति न बाधकाले शाब्दबो
धापत्तिः गोपदं गोत्ववदिति॥ गोत्वत्वे गोत्वप्रकारकशक्तिज्ञानं च गोत्वशाब्दबोधे हेतुरिति
न गोत्वमस्तीत्यतो गोत्वविशिष्टबोधापत्तिरिति चेत्॥ तथापि गोपदात् कदाचित्॥
समवायेन गोत्वविशिष्टबोधः कदाचित् कालिकादिसंबंधेन तद्विशिष्टबोध इति नि २८
यमानुपपत्तिः गोत्वविषयकशक्तिज्ञानस्याविशिष्टत्वात्॥ अस्मान्मतेनु समवाये

न गोत्वविशिष्टशाब्दबोधं प्रति समवायेन गोत्वविशिष्टशक्तिज्ञानस्य हेतुत्वेना
नुपपत्तेरभावात्॥ न च वृत्त्यात्यथाज्ञाननियमात्तथापि नियमः तथा सति जात्यावपि शक्ति
स्वीकारे प्रयोजनविरहान्। एवं गोत्वं गोपदशक्यमित्याकारकस्यैव शक्तिज्ञानस्य तै
र्हेतुत्वोपगमेन तत्सिद्धांतभंगापत्तेरिति॥ एवं पाधिप्रवृत्तिनिमित्तस्थले तैरप्युपाधिविशिष्टे
शक्तिस्वीकारात् यथा पशुपदस्य लोमवल्लांगूलविशिष्टे शक्तिः तथा जातिविशिष्टेपि स्यादुत्त
वस्य तुल्यत्वात्। न च जातेर्व्यक्तिवृत्तिवैद्यत्व नियमात् व्यक्त्या केन निंउपाधौ तादृश निय
माभावात् व्यक्तिबोधार्थं उपाधिविशिष्टे शक्तिरिति वाच्यं॥ नहि नियमबलादेव व्यक्ते
र्नानं कारणनियम्यत्वो कार्यस्य। तथा च जातिविशिष्टबोधे जातिशक्तिज्ञानस्य कारण
त्ववत् उपाधिविशिष्टबोधे उपाधिशक्तिज्ञानस्यापि कारणत्वस्य तुल्यत्वादिति॥
दिक्॥ कुत्रचिच्छक्तिवादिनस्तु॥ जातौ व्यक्तौ च शक्तिः परं तु जातिविषयकत्वेनैव ज्ञाता
शक्तिर्व्यक्तिविषयकशाब्दबोधे कारणं व्यक्तिशक्तिस्तु स्वरूपसदुपयुज्यते। न चैवं व्य

क्तिशक्तिस्वीकारस्यावश्यकत्वात् । वैयर्थ्यमिति वाच्यं ।। तत्पदशक्यस्यापि ज्ञानेन घटादे
रपि ज्ञानप्रसंगेन व्यक्तिशक्तिस्वीकारस्यावश्यकत्वात् । तथा च गोत्वप्रकारकगोविशेष्यक
शाब्दबोधं प्रति गोत्वविषयकगोपदशक्तिमती गौरित्याकारकशक्तिज्ञानं हेतुः नतु गोत्ववि
शिष्टविषयकगोपदशक्तिमती गौरित्याकारकं गोत्वमस्तीत्यादौ तादृशगोत्वप्रकारक
शक्तिज्ञानाभावान् गोत्वविशिष्टबोधापत्तिरित्याहुः तदसत् । गोत्वविषयकगोपदशक्ति
मती गौरित्याकारकस्य गोत्वविषयकत्वेन शक्तिज्ञानस्य हेतुत्वे गोत्वविषयकत्वस्य कारण
तावच्छेदककोटौ निवेशे गौरवात् ।। अथ मास्तु गोत्वविषयकत्वं निवेशस्तथापि गोपद
शक्तिमान् गौरिति गोत्वप्रकारकशक्तिज्ञानत्वेनैव गोत्वविशिष्टशाब्दबोधं प्रति हेतुतान
चैवमविवाद इति वाच्यं ।। व्यक्तिविषयतायाः कारणतावच्छेदककोटौ न निवेश इत्येव तन्मत
२९ निष्कर्षात् देशान्तरस्थगोबोधानुपपत्त्या समानविशेष्यकत्वेन कार्यकारणभावासंभवेन २९
लाघवेन समानप्रकारकत्वेनैव कार्यकारणभावोपगमादिति चेत् । न व्यक्तिविषयतायाः

नियमाभावान्तावपि शक्तिरिति वाच्यं । तद्विषयकत्वेन शक्तिज्ञानस्य हेतुतान्तदेवशक्यमिति ।। टी० ६

कारणतावच्छेदककोटौ निवेशो व्यक्तौ शक्तिस्वीकारवैयर्थ्यात् । न चैतदस्वीकारे गोत्वप्रका
रकशक्तिज्ञानत्वेन हेतुत्वासंभवः । व्यक्तौ शक्त्यभावेन शक्तिभ्रमस्य भ्रमत्वापत्तेरिति
वाच्यं ।। शक्तिर्हि न स्वरूपसती शाब्दहेतुः अपभ्रंशादपि शाब्दोदयात् । किंतु ज्ञाता तथा च प्र
शक्तिज्ञानं हेतुः तदेव शक्यमिति आकृतिवत् व्यक्तौ वैशिष्ट्यं च शक्यमेव । अन्यथा व्यक्तौ वे
व शक्तिः शक्तिज्ञाने च जातेरपि प्रकारत्वात् समानप्रकारकत्वेनैव कार्यकारणभाव इति ज्ञा
तावपि शक्तिः सिद्ध्येत न च यद्विषयकत्वेन शक्तिज्ञानं हेतुः तदेव शक्यमिति नियमेन व्य
क्तिविषयकत्वेन शक्तिज्ञानस्य हेतुत्व एव व्यक्तिशक्तिस्वीकारः स्यादिति दिक् ।। नैयायिकमत
मर्शयति ।। तस्मादिति गोत्वविशिष्ट इति । तौ व्यक्तौ वैशिष्ट्ये च शक्तिरित्यर्थः । तृतीयोपस्थाप्य
करणं चैकत्वयोरिव जातौ व्यक्तौ च विशेषणविशेष्यभावापन्नयोः शक्तौ गोत्वं व्यक्तिरिति त्रयीष्वेति । बोधप्र
संगानुगमौ रिति तथा च वैशिष्ट्यविशिष्टशक्तिः ।। एकं प्रवयवसंयोगरूपाकृतौ न विशिष्टे च गो
पदशक्तिः गोपदानुगतसाक्षात्विशिष्टस्यैव प्रतीतेः । तदुक्तं न्यायसूत्रे व्यक्त्याकृतिजातयः पदार्थ इति ।।

एकशक्तिसूचनाय पदार्थ इत्येकवचनं ननु तत्प्रकारकतद्विशेष्यकशाब्दबोधं प्रति तत्प्रका
रकतद्विशेष्यकशक्तिज्ञानत्वेन हेतुत्वमित्यायातं तेनाकाशागविशक्तिग्रहात्तद्बोधानाप
त्तिरूपबाधकस्य स्तत्त्वमित्याशंकते ॥ नचेति। उक्तदोषः शक्तिग्रहाविषयीभूतव्यक्तिबोधानाप
त्तिरूपदोषः। समाधत्ते गोत्वेति। तथाच सर्वत्रापि शक्तिग्रहादशक्त्यग्रहाविषयव्यक्तेरलीकत
पानत्तद्बोधाद्यनुपपत्तिरिति भावः ॥ सामान्यलक्षणानंगीकारेप्याह। अस्त्वेवेति। एकैवेत्यलौकि
कसाक्षात्कारविषयत्वेनाभ्युपगतेति शक्तिग्रहविषयगवीत्यर्थः। ननु योग्यतावशात् शक्त
ग्रहविषयव्यक्तेरपि भानेबाधकाभावइति अतिप्रसंगः। गोपदात् घटादेरपि बोधापत्तिः।
शक्तिग्रहाविषयत्वस्याविशेषादिति भावः। प्रत्यापत्त्य इति। गोत्वप्रकारकगोविशेष्यकशाब्द
त्वावच्छिन्नं प्रतिगोत्वप्रकारकगोविशेष्यकशक्तिज्ञानत्वेन हेतुत्वेन तथा न घटादिबोधापत्तिः॥ ३०
३० न्वंतत्त्वसज्ञोसेनापि गोनिवेशाद्गुरुगोत्वेनैवेति द्रष्टव्यं। ननु एकस्य गवादेः संबंधस्यानि
रत्ववीरयोरभावात् शक्तिसंबंधरूपा पालक्षणापातः। एकस्याः लक्ष्यतावच्छेदकत्वलक्ष्ययोर

स्तेनवित्तया लक्ष्यतावच्छेदकविशिष्टत्वलक्षणापा अनंगीकारेण गंगायां घोष इत्यादौ स्वस्त्व
नुपस्थापितस्यापि तीरत्वस्य शाब्दबोधे भानवत् शक्यतावच्छेदकस्य भावेपि न ह्रशक्यार्य
कारणभावत्वादेव गोत्वभाननिर्वाहे। लोकेऽत्र शक्तिकल्पनेनेति संप्रदायमते स्वरसं प्रकाश
यन्नव्यमतमाह ॥ गव्येवेति ॥ गौरवात्केचनेत्यकौ शक्तिस्वीकारेणैवोपपत्तौ जातिविशिष्ट
व्यक्तौ शक्तिकल्पने गौरवादित्यर्थः। नचैवमिति॥ एवं गोत्वे शक्त्यस्वीकारे घटादेरपि बोधापत्त्या
शक्यस्य शाब्दविषयतया गोत्वबोधानापत्तिरित्यर्थः। गोत्वेति। गोत्वविशिष्टशाब्दबोधं प्रति
गोत्वधर्मितावच्छेदकशक्तिग्रहस्य हेतुत्वेनानतिप्रसंगादित्यर्थः। गोत्वएव शक्तिः स्वीकारे च
गोत्वत्वधर्मितावच्छेदकशक्तिग्रहस्य हेतुतया गौरवाभ्युपगमाच्चैव शक्तिरिति ध्येयं। ननु जा
तिविशिष्टशक्त्यस्वीकारेण शाब्दे व्यक्तिभानोपपत्तावपि वाक्यार्थरूपान्वयस्यापि शाब्दविष
यतया तत्रापि शक्तिरास्तां। नत्त्वोचेपत्ति। जात्याकृतिव्यक्तयः पदार्थ इति व्यक्तपादीपस्य च
विरोधादिति नेत्यदापमते शंकते स्यादेतदिति- नत्वन्नेदृत्ते दिशाक एवेत्यत आह ॥ तस्येति। जाति

विशिष्ट एव शक्तिस्वीकारादिति भावः ॥ ननु योग्यतादिवत् आकांक्षापि भासते इत्याह । न चेति ॥
अतिप्रसंगात् । घटादेरपि बोधप्रसंगात् । गोः शक्तिरिति ॥ इतरपदसमभिव्याहृतं गोपदमित्य
र्थः ॥ गवान्वयेपीति । न च गोः अश्वक इत्यत्र अभेदः गामानयेत्यत्र चान्यविधः संसर्गो भासते इत्यत्र
ष्टं नियामकमिति वाच्यं अन्वयबोधे समानविभक्तिकत्व तत्पदसमभिव्याहाररूपानु
पूर्वीज्ञानस्यान्यत्र च तत्तदानुपूर्वीज्ञानस्य हेतुत्वादिति भावः । पदानां ज्ञातावभिधारूपा शक्ति
आक्षेपस्याच व्यक्तेरिति: अन्वयस्य चाक्षेपेणालाभासंभवादशाब्दबोधनेचातिप्रसंगात् ।
अन्वयोपि शक्तिः इत्थं च ज्ञातो अन्विते चाभिधारूपा शक्तिरिति भट्टमतं दर्शयति भट्टास्त्वि
ति । अन्वयविशिष्टे शक्तिग्रहाद भिन्नरूपशक्तिग्रहात् अन्वयेपि वाक्यार्थरूपे अन्वयेपि
३१ शक्तिरेवं अभिधारूपा शक्तिरेव अन्वयस्येति । गौः शुक्ल इत्यत्र वाक्यार्थरूपान्वयस्येत्यर्थः ३१
अन्यलभ्यत्वात् । अन्वयविषयकशाब्दबोधे तत्तदानुपूर्वीज्ञानत्वेन हेतुतया तद्बलादेवान्वय
भानोपपत्तिरित्यर्थः अन्वयविशेषज्ञानार्थं तत्तदनुपूर्वीज्ञानहेतुतायास्तथापि आवश्यकत्वा
दिति भावः । अन्विताभ्यर्हितेपि शक्तौ बाधकाभाव इत्यत आह ॥ अन्वेति ।

शाब्दार्थत्वात् । शाक्यत्वादित्यर्थः ॥ ननु शाक्यस्यैव शाब्दविषयत्वमिति नियमात् अनन्यलभ्यत्वे
न तत्र शक्तिरावश्यकीत्यत आह ॥ अन्यथेति । अन्यथा शाक्यस्यैव शाब्दविषयत्वमिति निय
मात् तत्र शक्तिकल्पने । लक्षणेति । लक्षणया नीरबोधोपपत्तिरित्यन्यलभ्यत्वात् तत्र न शक्तिः
शाक्यस्यैव शाब्दविषयत्वमिति नियमे तु तीरेपि गंगापदशक्तिप्रसंगेन लक्षणोच्छेदापत्ते
रित्यर्थः ॥ इदमुपलक्षणं । अन्विते शक्तिस्वीकारे अन्वितत्वेन पदार्थोपस्थितिः । अन्वयप्रकारक
शाब्दबोधश्च स्यात् । न त्वेतदनुभवसिद्धं अन्विते शक्तिः स्वरूपसत्युपयुज्यते न तु ज्ञाता ज्ञातो
पुज्ञाते नैवोपयुज्यत इति तन्मतनिरस्तमिति चेन्न: पदविषयकत्वेनैव ज्ञाता शक्तिरनुभवत्वे:
तत्रैव शक्तिरित्यन्वये शक्तिस्वीकारवैयर्थ्यापातात् शाक्यस्यैव शाब्दविषयत्वमिति नियमस्य च ल
क्षणे व्यभिचारादिति रहस्यमनुसंधेयं । केचित्तु भट्टमते ज्ञातावेवाभिधारूपा शक्तिः अन्वित
विषयकशाब्दत्वावच्छिन्नं प्रति घटपदज्ञानत्वेन कारणतेति घटपदादौ अन्विते आनुभावि
का शक्तिः नैयायिकमते आनुपूर्वीज्ञानस्यैव अन्वितशाब्दत्वं कार्यतावच्छेदकं । भट्टमते घटपद

...न्ति मत्तन्ते ध:-अन्वयविशिष्टशक्तिग्रहात्वाच्चेनघटपदादेरानुभविक
शक्तिग्रहात्।शक्तिरेव अनुभाविकशक्तिरेव।अन्वित विषयकशाब्दत्वं घटपदशक्तिज्ञा
नकार्यतावच्छेदकमित्यर्थः।अन्यलभ्यत्वात्।अन्वितशाब्दत्वस्यानुभवीज्ञानेनैतावच्छेदकतया
तकोटिप्रविष्टत्वादित्यर्थः।अनन्यलभ्यस्य च।आनुपूर्वीज्ञानादिरूपप्रकारेणालभ्यस्य च।
शब्दार्थत्वात्।घटपदशक्तिज्ञानकार्यतावच्छेदकोटिप्रविष्टत्वादित्यर्थः।तथा चान्वयविशेषणा
द्वत्वस्याप्युपस्थितिज्ञानकार्यतावच्छेदकत्वावश्यकत्वेऽन्वयविषयकशाब्दत्वस्य घटपदशक्तिज्ञा
नकार्यतावच्छेदकत्वे मानाभाव इति भावः।ननु शक्तिज्ञानकार्यतावच्छेदककोटिप्रविष्टस्य
विशेषविषयत्वमिति नियमादात तथेत्यत आह।अन्यथेति।तादृशनियममभ्युपेत्य तथात्वे
सति।तादृशनियमानुपगमे तीरविषयतायाः अपि गंगापदशक्तिज्ञानकार्यतावच्छेद
ककोटिनिवेशेन तत्र एवं तीरभानोपपत्तेः।तत्र लक्षणास्वीकारोऽनर्थः।हृत्तिर्हि न स्वरूपसत्यु
पयुज्यते किंतु ज्ञातैव निराचकुः।तत्संदर्भविरोधादुपेक्षणीयं।।ग्राम्याकारास्विति।कार्या ३२
न्वितेः वृत्तिसाध्यानयनाद्यन्वितेरित्यर्थः।तत्प्रयोजकतया प्रवृत्तिप्रयोजकत्वतया कार्यतावि
त्ति

त

शिष्टज्ञानमिति कार्यताइति साध्यतान विशिष्टविषयकं ज्ञानमित्यर्थः।अनुमिनोतिः।प्र
योजकस्येति शेषः।।अयंघटानयनगोचरकार्यतान्वितज्ञानवान् घटानयनगोचरप्रवृत्ति
मान्।स्तनपानगोचरप्रवृत्तिमत्वात्।स्तनपानगोचरप्रवृत्तिविशिष्टमदित्यनुमाना
पयोगत्वमाशंक्याह।स्वप्रवृत्तौ।इति।।स्वप्रवृत्तौ स्वीयस्तनपानगोचरप्र
कारोऽप्यवो।अप्रयोजकत्वमाशंक्याह।स्वप्रवृत्ताविति।।स्वप्रवृत्तौ स्वीयस्तनपानगोचरप्र
वृत्तौ।तेन।बालेन कार्यत्वे विशिष्टज्ञानस्य कार्यान्वयशक्तिगोचरज्ञानस्येत्यर्थः।।हे
तुत्वावधारणादिति।तथा च कार्यकारणभावग्राहकत्वानुकूलतर्क इति भावः।तद्धेत्वाकांक्षायां
कार्यान्वयगोचरज्ञानकारणजिज्ञासायां तथा कार्यत्वविशिष्टज्ञानहेतुत्वेनान्निर्वाहि
कार्यान्वयगोचरज्ञानकारणजिज्ञासायां तथा कार्यत्वविशिष्टज्ञानहेतुत्वेन निर्वाहिका कार्यान्वितेरनिः।यद्यपि घटान
कांशाद्देकार्यत्वविशिष्टविषयकज्ञानोपधायकत्वे निर्वाहिका कार्यान्वितज्ञानत्वेने
यनगोचरप्रवृत्तौ घटानयनगोचरकार्यताविशिष्टज्ञानत्वेन हेतुत्वं न तु कार्यान्वितज्ञानत्वेनं
तिकार्यान्विते शक्तौ बीजाभावः।तथापि न केवलं कार्यमिति ज्ञानात्प्रवृत्तिः।किंतु घटानयनं
कार्यमिति ज्ञानात् तच्च कार्यताविशिष्टज्ञानं कार्यान्वितज्ञानमेवेति तत्र शक्तिः।~~कमनाकाल~~
~~तत्र विनाघटस्मानपेतिवाक्यमकार्यताविशिष्टस्मानंकार्यान्वि~~
कार्यताविशिष्टज्ञानत्वेन कार्यान्वितज्ञानत्वस्यापि अवच्छिन्नप्रयोजकत्वान्नपा मा

तत्तानमैवेति नचास्य किं ।। एवमनाकलितपदविभावास्य घटमानयेत्विवाक्यस्य कार्यताविशि
ष्टज्ञानजनकत्वं कार्यान्वितशक्तौ न निर्वहति । अन्यथैकपदस्यैव कार्यत्वविशिष्ट [illegible]
[illegible] कार्यता विशिष्टज्ञानजनकत्वेन हेतुत्वं न तु कार्यान्वि
[illegible] कार्यान्वि [illegible] केवलं कार्यमिति [illegible]
[illegible] नयनं कार्यमिति [illegible] कार्यान्वित [illegible]
मनाकलितपदविभावास्य घटमानयेत्विवाक्यस्य कार्यता विशिष्टज्ञानजनकत्वं च कार्यान्वि
तशक्तौ न निर्वहति । अन्यथैकपदस्यैव कार्यत्वविशिष्टे शक्तौ तदितरपदस्य वैयर्थ्यापत्तेः कार्यान्वि
तशक्तौ सर्वेषामपि कार्यता विशिष्टज्ञानजनकत्वं संभवति कार्यता विशिष्टज्ञान [illegible]
त्वेन कार्यान्वितज्ञान [illegible] कार्यान्वितस्वार्थप्रतिपादकतया इतरान्वि
३२ तस्वार्थप्रतिपादकतयावेति । तथा च कार्यान्विते पदशक्तिकल्पनायां विशिष्टज्ञानजनकत्वेन विशिष्टमि
तिसर्वत्र कार्यान्विते एव शक्तिरित्यास्वेड लाघवं । आवापोद्वापाभ्यां संग्रहत्यागाभ्यां प्रथमेति ३२
शब्दसामान्ये कार्यान्वितज्ञानजनकत्वेन निर्वाहके शक्तिकल्पनानुरोधादित्यर्थः । ननु लाघवा

कार्यताविशिष्टताजनकत्वं च

५ पत्रे

तथास्त्वित्यत आह आद्येति । शब्दसामान्ये कार्यान्वितशक्तिकल्पनाया विरोधादित्यर्थः । शब्दसा
मान्यस्य कार्यान्वित एव शक्तेरेव कृप्तेः विधेरेव प्रामाण्ये न तु अर्थवादस्येति दर्शयति इत्थं चेति ।
शब्दसामान्यस्य कार्यान्विते शक्तिरेवेत्यर्थः । पचन्नं तेन घटेऽस्तीत्यादौ । कार्यत्वावाचकेति ।
कार्यत्वावाचकपदे लिङ् लोट् तव्यः पंचमलकारः कृत्यश्चेति विधिप्रत्ययास्तन्निर्मुक्तावीरो न अ
स्तीत्यर्थः । विध्यसमभिव्याहृतं वैदिकवाक्यमर्थवादः । स्वरूपेव शाब्दबोधानुपपत्ते प्रमेव ।
ननु तर्हि पूर्ववृत्तकथनाभावात् प्रवृत्त्याद्यनुपपत्तिरत आह व्यवहारस्त्विति । प्रवृत्ति रस्तीत्यर्थः ।
असंसर्गेति । असंसर्गग्रहाभावात् बाधाभाववत्त्वादित्यादि तावत् । तेनमेसर्वत्र प्रवृत्तिं प्रविशि त्र
ष्टज्ञानस्य हेतुत्वानभ्युपगमादिति भावः । ननु शब्दसामान्यस्यैव कार्यान्वितशक्तत्वात् । कार्यान्वि
तशक्तिज्ञानस्यैव च शाब्दबोधहेतुतया विधेरिव शब्दसामान्यस्यैव कार्यतावाचकपदसत्त्वात् । कथं
सिद्धार्थवादानां प्रामाण्यमित्याशंकते । नन्विति । कार्यतान्विते इति कार्यता विशिष्टार्थेऽन्विते इत्यर्थः ।
कार्यान्वितवाचकत्वादिति यावत् । तद्वाचकेति । कार्यतावाचकपदेत्यर्थः । विधेरिव पदसामा
न्यस्यैव कार्यतावाचकपदत्वादिति भावः । असंगतं चेति । सर्वस्यापि कार्यतावाचकपदत्वात् ।

कार्यतावाचकपदसमभिव्याहारप्रयुक्तमप्रामाण्यं कथमर्थवादस्येत्यर्थः। अत्र पदानां कार्या
न्वितेऽभिधारूपैव शक्तिः घटादिपदात् कार्यान्वितघटत्वादिनैव पदार्थोपस्थितिः घटादि
पदेन कार्यान्वितविषयकशाब्दबोधे जननीये इतरा विशेषणतया कार्यत्वोपस्थापकलिङ्गादि
पदस्य सहकारित्वाद्वेन सिद्धार्थकार्थवादस्य प्रामाण्यमिति कार्यान्विते अभिधारूपशक्तिमादा
यार्थवादस्याप्रामाण्यमुपपादयितुं शक्यते तथापि कार्यत्वोपस्थित्यर्थं हि घटादिपदानां कार्यान्वि
तशक्तिः सा चावश्यापेक्षणीयलिङ्गादिपदादेव ज्ञानेति व्यर्थं घटादिपदानां कार्यान्वितेऽभि
धारूपशक्तिकल्पनेन। एवं कार्यान्वितत्वेन शाब्दबोधेऽनुभवबाधश्चेत्यतस्त्वभिधारूपश
क्तिमुपेक्ष्यानुभाविकशक्तिमादाय समाधत्ते। अत्रोच्यत इति अनुभाविकाशाब्दानुभवजनि
का। स्मारिका पदार्थस्मृतिजनिका। तत्रेति। कार्यत्वान्वितविषयकशाब्दत्वावच्छिन्नं प्रतिघ
टपदज्ञानत्वेन कारणतेत्यर्थः स्मारिका चेति। जातिशक्तिज्ञानबलात् केवलं घटत्वजातिस्मृ
३४ तिः। शक्तिज्ञानस्योद्बोधकविधया पदार्थस्मृतिहेतुत्वादिति भावः। ननु कार्यान्वितबोधे घटा ३४
दिपदज्ञानस्य हेतुतया तस्यैव कथं नानुभवजनकत्वमत आह। कार्ये चान्वयबोधे इति। घटा

दिपदेन कार्यान्वितविषयकशाब्दबोधे जननीये कार्यतावाचकलिङ्गादिपदजन्योपस्थितेः सहका
रित्वादित्यर्थः। नार्थवादस्येति। विशेषसामग्रीसहकृताया एव सामान्यसामग्र्याः फलोपधानेन त
त्तत्कार्यत्वोपस्थापककलिङ्गादिपदाभावेन तज्जन्यकार्यत्वोपस्थितेः सहकारिण्या अभावात्।
शाब्दानुभवजनकत्वरूपं प्रामाण्यं नार्थवादानामित्यर्थः। लाघवात्। कार्यान्वितघटविषयकशा
ब्दत्वापेक्षया लाघवात्। घटादिमात्रेइति। घटविषयकशाब्दत्वावच्छिन्नं प्रत्येव घटपदज्ञानत्वेन का
रणत्वग्रहइत्यर्थः। नचेति। ननु घटपदादेः कार्यान्वितघटविषयकशाब्दत्वे कार्यतावच्छेदकेमित्य
र्थः। अनन्यलभ्यत्वादिति कार्यतावाचकपदजन्यबोधविषयत्वादित्यर्थः। घटविषयकशाब्दत्वावच्छि
न्नं प्रति घटपदज्ञानत्वेन कार्यत्वविषयकशाब्दत्वावच्छिन्नं प्रति च लिङ्गादिपदज्ञानत्वेन हेतुता
यां च लिङ्गादिपदसमभिव्याहारस्थले तादृशसमभिव्याहारादेव कार्यान्वयबोधः। यत्र तु न तत्स
मभिव्याहारस्तत्र केवलं घटादेर्बोध इति अर्थवादस्याप्यप्रामाण्यमिति भावः। ननु अनन्यलभ्यत्वेन
स्वरूपसत्त्वतिवंध्य कुक्षिं ज्ञातं यदि शक्यं स्यात् तर्हि अनन्यलभ्येन स्यादिति तर्कस्यैतेनोत्थापना
तथा चैतन्नोपस्थितं तत्र कार्यान्विते शक्तिग्रहबाधकाभावस्याशंक्य। प्रथममिति॥ प्रथमं लिङा
दिपदस्य कार्ये शक्तिग्रहात् पूर्वं कार्यान्विते शक्तिग्रहात् घटपदज्ञानस्य कार्यान्वितविषयकशा

द्दत्वं कार्यतावच्छेदकमस्त्वित्यर्थः। तत्त्वन्नु तत्सत्वं घटमात्रे इति घटविषयकशाब्दत्वं कार्यतावच्छे
दकमस्त्वित्यर्थः॥ सा कार्यान्विते शक्तिकल्पनाबाधितांश प्रामाण्यग्रहविषयीक्रियतां गौरवात्॥
घटमात्रशक्तिकल्पनापेक्षयैवा गौरवात्। ननु सामान्यतः प्रथमग्रहेन कल्पनापाः बलवत्त्वेन कथं तद्बाध
इत्याह॥ अथैवमिति॥ ननु प्रथमग्रहेन चेत्स्वबलत्वप्रयोजकतया कथं न बलवत्त्वमातत्राह। नहीति
परिमाण शास्त्रादिति। शततयोजनपर्यंतं इति चंद्रबोधकात्प्रोति:शास्त्रादित्यर्थः तथाच चक्षुरादिना ज्ञातस्वल्प
५ तायां अप्रामाण्यज्ञानवदत्रापि घटपदादेः कार्यान्वितघटादौ शक्तिज्ञाने प्रामाण्यं कस्त तद् इति भा
१ नहुचे वः॥ इदानीं शास्त्रजन्यमहत्परिमाणज्ञानेन बाधात् तत्र स्वल्पपरिमाणज्ञाने अप्रामाण्यं कल्पते प्रकृते च
प्रथमं कार्यान्वितघटादिना वै। शक्तिपरिकल्पने बाधकाभावान्न तद्बाधः। अस्मात्तु बाधके प्रथमप्र
वृत्तत्वस्यैव बलवत्वेन तत्त्वादित्यत आह। चरमकल्पतया इति लाघवेति। कार्यान्वितघटादौ शक्ते
रबाधेपि कार्यान्वितत्वविशिष्टघटत्वस्य घटत्वापेक्षया गुरुतया शक्ततावच्छेदकत्वासंभवेन कार्या
३५ न्वितघटत्वावच्छिन्नाभावेन तद्रूपेणैव तत्र शक्तिकल्पने बाधः स्यादेव तद्धर्मावच्छिन्नाभावव
तितद्धर्मावच्छिन्नप्रकारकज्ञानत्वमेव हि भ्रमत्वमिति भावः। ननु कंबुग्रीवादिमत्त्वं घटत्वापेक्ष ३५
या गुर्वितिगौरवज्ञानसत्त्वेपि कंबुग्रीवादिमान्नास्तीति प्रतीत्युदयात्। यथा गुरुधर्मस्य प्रवि

गितावच्छेदकत्वमुपेयते॥ तथा गौरवेपि प्रथमग्रहीतत्वात् कार्यान्वितघटे शक्तिः स्यादेवेत्यत
त्पन्नं तुदुर्ज्ञानमिति न्यायेनाह। द्विंचैवमिति॥ एवं कार्यान्वितघटादौ शक्तिकल्पने शक्तिज्ञानेन त
शाब्दसामान्ये जननीये कार्यतावच्छेदकपदजन्योपस्थितेः सहकारित्वे चेत्यर्थः॥ अनुभवसि
द्धत्वेन न दुरपह्नवत्वं सूचितं। न स्यादिति। लिङादिपदरूपकारणाभावादिति भावः॥ न चेति
पदार्थोपस्थितिबाधाभावमात्रादेव व्यवहारादिति भावः। न दापत्ते: असंसर्गाग्रहापत्ते:
कार्यादौ तु भवन्तिदुत्स्यापि संसर्गानुभवस्यापत्ता पेक्षिङ् समभिव्याहारे अपि अपक्षापत्वस्यादि
तिभावः। नन्विष्टापत्तिरत आह। तथाचेति। ननु प्रथमं कार्यान्वित एव शाब्दबोधारणात् तत्सह
कारि कार्यतावाचकपदरूपकारणाभावात् विध्यसमभिव्याहारस्थले संसर्गाग्रह एवोपेयते
कारणाभावे कार्याभावस्यावश्यकत्वात्। विधिसमभिव्याहारस्थलेऽबाधकाभावे शाब्दानुभव
एवोपेयते अत एव शाब्दप्रामाण्यमपीत्यत आह। किंचैवमिति। एवं कार्यतावाचकपदसमभि
व्याहारस्थल एव शाब्दानुभवस्वीकारे स्यादिति॥ तादृशपदसमभिव्याहाराभावादिति भावः
ननु केषांचित् प्रामाण्येपि लिङ्समभिव्याहृतपदमात्रापेक्षयैव शाब्दप्रामाण्यं स्यादेवेति तेषामप्रा
माण्येष्टापत्तिरित्यत आह॥ तथाचेति। पुराणादीनामप्रामाण्यं त्वंगीकार्यं चेत्यर्थः

मिश्रैः वाचस्पतिमिश्रैः बुद्धबंधुरिति कुधैर्नैकस्यापि शब्दस्य प्रामाण्यमुपेयते प्राभाकरैस्तत्क
स्यापि च्छिन्नस्य प्रामाण्यं चांगीकारात् तन्नतदंतर्भूतत्वमित्यत उक्तं बंधुरिति यथा तैरनुभवसिद्धो
ऽप्यनुपपत्त्यपत्तत्व इति वेदस्य प्रामाण्यमनुच्यते तथा पुराणैरिव प्रामाण्यं तत्वेत्तिसाम्यं बोध्यं। एवं
र्भा वदन्तः अनुभवसिद्धेपि प्रसिद्धसंसर्गाग्रहमात्रेवदन्त्व एवेत्यासः रक्तकं दन्यत्वत्र रतिलिपिसाद
श्यं तत्र कोरल्लकारयोगोऽङ्गितिप्या साद्दश्येनतामा अनयोः सादृश्यं बोध्यं पुंस्त्वे मुख्यश्याम इति। अनु
५० भवानुरोधेनैव सर्वकल्पनात् तथा च लिंगाद्यसमभिव्याहृतलेख्यानुभवस्यापलापानर्हत्वेन ला
घवेन च घटत्वविशिष्ट एव शक्तिस्वीकरणमुचितमिति भावः। वस्तुतस्तु अतिप्रसक्तधर्ममादा
यान्वयव्यतिरेकयुक्तासंभवात्। प्रत्यक्षस्थले कार्यत्वकारणतावच्छेदकधर्मग्रहमन्तरा कारणत्व
ग्रहासंभवेपि शब्देऽतिप्रसक्तधर्मसामानाधिकरण्येनापि तद्ग्रहः यथा स्वर्गकामो यजेतेत्यादौ यागे
३६ ऽस्नानादितोपि स्वर्गोदयात् स्वर्गत्वावच्छिन्नेन यागजन्यत्वासंभवेन वेदात् प्रथममनुपस्थितेः ३६
स्वर्गत्वयागत्वसमानाधिकरण्येन कार्यकारणभावग्रहः। तथा प्रकृतेपि शब्दे कायन्वितज्ञाने ज्ञान
कत्वं गृहीतं न तु कायन्वितज्ञानत्वावच्छिन्नं प्रतिततस्तेतरपदे संहकारकत्वेपपन्नमिति न कार्या

न्विते शक्तिरिति पदं तावच्चतुर्विधं रूढं यौगिकं यौगिकरूढं योगरूढं च। यत्रावयवशक्तिनैरपेक्ष्ये
ण समुदायशक्तिमात्रेण बोधः तद्रूढं। यथा गोपदं। यत्रावयवार्थ एव बुध्यते तद्यौगिकं। यथा याचका
दिपदं। यत्र यौगिकरूढार्थयोः स्वातंत्र्येण बोधः तत् यौगिकरूढं यथोद्भिदादिपदं यौगिकं खनित्रे रूढं
यागविशेषे। योगरूढं पंकजादिपदं। तत्र पंकजसमुदायः पद्मत्वविशिष्टे रूढो न वेत्ति योगरूढैवि
त्ति पत्तिः। पंकजपदात् पद्मत्वविशिष्टप्रतीतये पद्मत्वविशिष्टे यत्तत्समुदायस्य रूढिरावश्य
त्न कीपदानियतोपस्थितेर्विनिसाध्यसात्। पंकजपदात् योगेन कुमुदस्यापि बोधप्रसंगाच्च॥ व
मन्मते कदाचित् कुमुदबोधस्यालक्षणयेव न तु रूढिस्वीकारेपि भाङित्यदे न खनित्रमिव पंकज
पदात् कुमुदमपि बोध्येत योगस्यापि च अत्र प्रश्नः। यत्र योगरूढित्यामेलार्थबोधस्तत्र केवलयौगिका
र्थबोधे रूढिः प्रतिबंधिका न कुमुदबोधस्तु तात्पर्यगम्य इति। रूढ्या नियमनः स्मृतं पद्मे वक्त
र्त्तृरूपव्युत्पत्तिवाचकप्रत्ययेन पंकजनिकर्तृतयानुभावते बाधे विना यत्किंचिन्नातां सेनिहि
तविशेषपरत्वानियमात् व्यक्तिवचनोक्तिं विशेष्यक्तितात्पर्यकारणैः संनिहितः। प्रथमं उपस्थित
इत्यर्थः। तथा च पद्मनात्पर्यस्त्वेन पंकजनिकर्तृकत्वयातदेवयोगेनापि प्रतीयते न कुमुदमिति

रूढेर्न प्रतिबंधकत्वं याह्यत्प्रभावानवगाहित्वात्। जनकत्वानाद्विरोधित्वाच्च सिद्धेरनुमितिप्रतिबंध
कत्वस्यानापत्तेः स्वंकारेपि अन्यत्र ज्ञानस्य प्रतिमंचादिन्यायेन प्रतिबंधकत्वेमानाभावात्। ऐक्यं च प
द्मानुभवसामग्रीसत्त्वात्। पदत्वेऽप्यन्यैव बोधोन कुमुदस्य सामग्र्यां सत्यां हि रूढ्यभावेन प्रतिबंधक
२७ त्वनादिति वदंति॥ अत्रेदं चिंत्यते। पंकजं कुमुदमानयेत्यादौ येयच्च पंकजपदस्य पदेतात्पर्याभावः २७
कुमुदे च तात्पर्यग्रहः। तत्र लक्षणां विनैव कुमुदबोधापत्तेः। पद्मानुभवसामग्र्या विरहात् पद्मे ता
त्पर्याभावनिश्चयस्यैव तत्र बाधकत्वेन बाधकं विना व्यक्तिवचनानां संनिहितविशेषपरत्वमिति
न्यायस्य तत्रानवतारात् घटेन जलमाहरेत्यत्र सच्छिद्रघटस्य प्रथमोपस्थितत्वाद् अन्वयवारणाय
बाधकं विनेत्यस्यावश्यकत्वात्। तथा च रूढ्या तत्प्रयोगस्य पद्मान्वयानुपपत्तिपुरःसरैव कुमु
दधीरिति न स्यात्। कुमुदं पंकजमित्यत्र कुमुदस्यैव प्रथमसंनिहितत्वसंभवाच्च कुमुदस्याभि
न्नपदोपस्थापत्वेपि प्रथमोपस्थितिमात्रस्यैवापेक्षणीयत्वात् अवयवार्थस्यासमुदायस्याभि
न्नत्वेन पद्मस्यापि भिन्नपदोपस्थाप्यत्वाच्च। अथ कुमुदबोधस्तत्र प्रत्यासत्त्यैवास्तां पंकजपदस्य कुमु
देन लक्षणेति प्रवादस्तु कांचिकाभिप्रायेण यत्र योगरूढिः स्यात् पद्मानुभवसत्त्वदनंतरं कुमुदेता
त्पर्यज्ञानं तत्र स्वनंतरोपस्थित्यपेक्षकुमुदे लक्षणोदयात्। परे विशेषोयं संप्रदायमते सर्वत्रदाण
ला

मणिकृन्मतेऽकांचिकीति चेत् न तत्रापि पंकजनिकर्तृत्वस्य कुमुदे तात्पर्यग्रहकाले पुनः
स्तं पंकजपदेन शक्त्यैव कुमुदेऽपस्थापनसंभवात्॥ पद्मे तात्पर्याभावनिश्चयेन कुमुदेता
त्पर्यनिश्चयस्यचेन च पद्मेऽन्वयासंभवात्। अन्यथा लक्षणानापत्तेरिति यत्तु शक्त्या पुनर्ना
नापदत्तदर्थानुसंधाने पदैवावार्थविषयाकुरूपस्थितिकत्वेन लक्षणया पंकजनिकर्तृत्वस्य
पदार्थतया लघुपस्थितिकत्वमिति तत्र पंकजेन्म कर्त्रीरमानयेत्यादौ वाक्यमात्रेण
वलक्षणापत्तेः। पृथ्वीक्षत्रिवयोग्यतादिवलाद्विशिष्टबोधान्नलक्षणेति चेत्। प्रकृतेपि
समानं तस्मात् रूढिज्ञानं प्रतिबंधकत्वकल्पएव लक्षणासंभवः। विरोध्यविषयत्वेपि सिद्धे
रनुमिताविव रूढिज्ञानं प्रतिबंधकमिति। स्तत्तयमात्वयानुपपत्त्यनंतरं कुमुदधीरिति लक्ष
णाव्यवहारो वस्तुतो रूढ्यनतिवेदमणिकृन्मते गतिरिति। नतु पंकजपदस्य पद्मे लक्षणैवास्तां
वाक्यशक्त्यभावेपि तदुद्बुद्धेतत्संभवात्॥ न च शक्यपद्मसाधारणैकरूपाभावेनातद्वत्त्वार्थ
यास्तस्यात्यभावात्। पुणपदवृत्तिद्वयविरोध इति वाच्यं। सतिसेतात्पर्ये गंगायां घोषमत्स्यो

ति३

स्त्वइत्यत्रैव मणिकृन्मते तस्या दोषत्वादित्यभिप्रायं। शक्ये बाधके सत्येव लक्षणेति गुरवो
बाधकाभावेन लक्षणापत्तिर्नापि हृदे कुमुदसाधारणबोधापत्तेः तात्पर्यानुपपत्त्या
यष्टीः प्रवेशयेतिवल्लक्षणयापादनोऽपि पद्मकुमुदयोस्तुल्यतापत्तेः ॥ लक्षणाविशेषा
द्गतथात्वपद्मान्वयानुपपत्तिसंधानानंतरं कुमुदधीरिति सिद्धांतव्याकोपः। एवं धेनुप
दमपि द्योगरूढमेवेति। ननु पद्मत्वेनैव प्रयोगोपाधिरस्त्विति चेन्न पद्मत्वज्ञानेन
प्रतिबंधकत्वं। अगृहीतनियततत्प्रयोगस्य कुमुदसाधारणबोधदर्शनात् रूढिज्ञानमेव
स्वाभाववत्त्वसंबंधेन प्रतिबंधकमिति। ननु अयोग्यतापद्मत्वमपहाय केवलावयवशक्त्या
कुमुदबोधोऽस्तु किं लक्षणया रूढयोगप्रतिबंधकत्वमुक्तं तथा संभवेऽपि मणिकृन्मते रूढेः प्रति
बंधकत्वात्। इति चेन्न। पद्मान्वितत्वेनोपस्थितस्य पंकजनिकर्तृत्वस्याश्रयनिराकांक्षतया
स्वतंत्रोपस्थितये लक्षणाया आवश्यकत्वात्। एवं पंकजपदात्स्थलपद्मबोधो लक्षणयैव। स्थल २८
२८ पद्मं विजातीयमेवेति पद्मत्वमिति सदृशत्वेनौ स्थलपद्मत्वविशिष्टे वा पंकजपदस्य लक्
क्षणा यदि चानुगतं तीत्या तत्रापि पद्मत्वजातिस्तथापि स्वतंत्रोपस्थितये तत्र लक्षणा

अथायोग्यतया योगार्थान्वयेऽपि योग्यतया रूढ्यर्थ पद्ममेव बुध्यत इति चेन्न योगार्थं पंकजेन प
द्मस्योपस्थित्या निराकांक्षत्वात्। स्वतंत्रोपस्थितेः पीतत्वावश्यकत्वात्। यद्यपि शाब्दान्येन
रूपेण ज्ञाते नवति लक्षणेति न्यायो ति समुदायस्य पद्मत्वेन लक्षणा न युक्ता। तथापि वृ
त्तेर्बोधकपद एव साबोध्या। अत एवं चित्यं स्थलेपंकजमिति अत्र पंकजनिकर्तृत्वस्य पद्मे
तात्पर्याभावग्रहे तदन्वितं पद्मत्वस्य साकांक्षत्वमेव यत्र वा प्रथममन्वयस्तत्रापि स्थलप
द्मतात्पर्यग्रहानंतरं पुनःस्मृतपंकजपदात्स्वतंत्रोपस्थितिर्लक्षणयैव अपा एवं च शक्यैव तदा
तदुपस्थितिरावश्यकत्वं अयोग्यत्वेन योगार्थस्यानन्वयादिति। अपि च स्वपेनेनाभिचरति जन्ये तत्र
वदनिष्ठानुबंधित्वसाधनत्वरूपविध्यर्थे विशेषणांशमबहायपथा विशेष्यान्वयस्तथा अ
योग्यतया विशेषणानन्वयेऽपि विशेष्यान्वये वा धाकाभावः। योगार्थस्यैव विशेष्यत्वे च पंक
जपदमित्यत्र यत्तत्स्य साकांक्षत्वं तयालक्षणानुपपत्तेरिति दिक्। इदं तु बोध्यं। आकाशपदे न
निरवच्छिन्नैव शक्तिः यत्नीनामानेत्याभावेनानुगमकधर्माऽनिर्वचनात् न तत्र तुंपक्ष्मा पितस्यैव
शाब्दबोधविषयत्वात्। शब्दाश्रयत्वं ततः कथं नासेनेति वाच्यं नियमतोयमवित्तेनोपस्थिते

यत्र शक्तिग्रहस्तत्स्मरणजनकसंस्कारस्य तद्धर्मविषयतानियमेन तद्बोधकादेव तद्देशेषु
बोधकनियमेन च आकाशपदादशक्यस्यापि तस्य भानात्तथाहि। शक्तिर्हि एतत्संबंधितान
न्यतरसंबंधिस्मारकमिति रीत्या पदार्थस्मारिकायेन रूपेण चोपस्थितयोः पदार्थयोः संबं
धः ज्ञानं तद्रूपावच्छिन्नज्ञानात्। संबंधांशे उद्बुद्धसंस्कारसहकृतेनात्तद्रूपावच्छिन्नस्मरणं
तत्र च संबंधितावच्छेदकस्यापि जन्यताजनकतावच्छेदकत्वमिति निवेशश्चावश्यकः। अन्यथा
धाहस्तिपदवत्त्वेनोपस्थितेमहत्त्वेनोपस्थितेर्गजत्वेन चोपस्थिते हस्तिनि संबंधग्रहे मनुष्य
त्वेन हस्तिपदज्ञानात्॥ गजत्वेन हस्तिस्मरणापत्तेः। तथा च यद्धर्मविशिष्टे शक्तिज्ञानं तद्धर्म
विशिष्टमेव तत्स्मारयतीति॥ आकाशमात्रे शक्त्यावपि शब्दाश्रयत्वस्य स्फूर्तिसंभवः। वस्तुपस्थाप्य
त्वस्यैव शाब्दविषयत्वे तन्त्रत्वे तु स्वरूपेणोपस्थाप्यत्वस्येति लक्षणावच्छेदकवत्। शाब्दबोधविष
३९ यत्वमपि॥ अथैवं गोत्वमपि शक्यं न स्यात्। यदि च विशेष्यवृत्त्यैव विशेषणस्मरणे लक्षणा ३९
वच्छेदकवत् नियतस्मृतेरनुपपत्तिः रूपान्तरेण शक्तिग्रहसंस्कारविषयत्वाननुभावात्
किं चान्यसंबंधेनाप्यन्यसंस्काराद्बोधे यदा तत्प्रमुष्टतत्ताकस्मरणेनानुपपत्तिः। अनुभवविरो

षयत्वस्यापि नियमेन भानसंभवात्॥ घटत्वशक्ते रेवतद्देशेषु बोधकत्वसंभवात्।
उद्बोधकान्तरानुसरणे च लक्षणावच्छेदकवत् नियतस्मरणानापत्तेः तस्मात्तत्पदात् नियतो
पस्थितिः स्वसंबंधसाध्यास च संबंधः परिशेषाद्वृत्तिरेव पर्यवस्यतीति पदान्नियतोपस्थिति
र्लक्ष्यसाध्येति नियमात्॥ गोत्वं शक्यमिति विभाव्यते तदा शब्दाश्रयत्वे दिकृत्यमिति चेदाकाशा
दपि शक्यत्वादिनियमेन तदुपस्थितिः। आकाशशब्दाश्रयत्वस्य चाकाशपदवाच्यत्वात्थैवोपप
त्तेस्तत्पर्यायत्वेऽपि सहप्रयोगानुपपत्तिः। वस्तुतस्तु कदाचिच्छब्दाश्रयत्वेन कदाचिदष्टद्रव्याति
रिक्तद्रव्यत्वेनैवोपस्थितेर्न नियतावच्छिन्नोपस्थितिरिति तत्तद्रूपेण धर्मिणो बोधकादेव तद्देशेषु बोध
संभवात् तत्स्मृतेः शाब्दबोधस्य चोपपन्नत्वात्। यदि च संस्कारस्य कदाचित्तद्देशे बोधस्तदा नो
ऽस्तु वा पदादपि निर्विकल्पकं। आकाशपदात् निष्प्रकारकमेव स्मरणं शाब्दबोधश्च पर्यायान्तरमा
दाय सविकल्पक एव आकाशो द्रव्यमित्यत्र भिन्नविभक्तिमत्त्वेन संख्यामादाय भिन्नप्रकारकोपस्थि
तिसत्त्वात्। अभेदान्वयोऽनानुपपत्तेरिति दिक्। ... नियतानुपस्थितावपि विनिगमकाभावा
त्तशक्यं। अतादिपदे स्मृतार्थत्वेनाप्युपपत्तेः एकत्र धर्मिण्यपि प्रवृत्तिनिमित्तद्वये बाधकाभावा

ता।वस्तुतस्तु शब्दस्य संबंधमेव शक्यतावच्छेदकं लाघवात्।घटत्वं च तद्रूपांतरेण बोधस्तु शक्ति
भ्रमात्।।कंबुग्रीवादिमत्त्वेनैव घटस्य तत एवानियतोपस्थितिरिति शक्तिभ्रमात् कंबुग्रीवादिम
तोपस्थितिवदुपपत्तेरिति न नानार्थत्वमपि।ति।केचित्तु व्यक्तेरेवानुगमानतिप्रयोजनाभावेन
धर्मेन शक्तिकल्पनमित्याहुः।निर्विकल्पकोपस्थिताकाशादिज्ञानासंभवेन शाब्दबोधानुप
पत्तिः।एकस्यैवैकत्वस्याभयार्थत्वात्तद्विपक्षायां विभक्त्यर्थसंख्यामादाय भिन्नप्रकारकोपस्थित्य
भावेनाकाशो द्रव्यमित्यत्राभेदान्वयानुपपत्तिश्चेति पक्षाश्रिविकल्पकस्थितिस्वीकारोऽनुचितस्त्व
न्येदित्तिदिक्।नन्वियता प्रबंधेन पदज्ञानेन शाब्दसामान्यजननीये शक्तिग्रहः सहकारी पामरा
णां च तदभावान्न शाब्दबोध इति।बि।वेचितं प्रपंचेदं संभवति गंगायां घोष इत्यादौ गंगापदस्य
तीरे शाब्दबोधोदयादित्याशंकते।नन्विति।तीरेति।तीरे गंगापदशक्त्यभावादिति भावः।।तत्रै
न शक्तित्वेनानुप्रयोजकत्वात्सती शाब्दबोधोदयो मि निर्विकल्पवृत्तित्वेनेति प्रयोजकत्वेति दूषयति
४० वृत्तित्वं च शक्तिलक्षणान्यतरत्वं।लक्षणैवेति।शाब्दसामान्ये वृत्तिज्ञानत्वेन हेतुतया ४०
गंगापदस्य तीरे लक्षणारूपवृत्तिज्ञानसत्त्वात्।।तीरशाब्दबोधोनानुपपन्न इति भावः

तीर

श्रीः नच गंगायां घोषः प्रतिवसतीति व्यवहारदर्शनाद् गंगापदस्य तीरेपि कथं न शक्तिरिति
चेत्।।न लक्षणीयपदार्थानामनंततया सर्वत्र शक्तिकल्पने गौरवात्।।शक्यसंबंधरूपा
लक्षणैव क्लृप्तेव।एवं एकसंबंधिज्ञानस्यापरसंबंधिस्मारकतया गंगापदजन्योपस्थितेः
८८ शक्यसंबंधरूपलक्षणाजन्यत्वमपि।क्लृप्तमेव लक्षणाजन्योपस्थितेः शाब्दबोधानुकूलत्वमात्रं
कल्प्यते शक्तिस्वीकारे त्वतिरिक्तधर्मिकल्पनमिति धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेन
तीरे लक्षणैव।अथ शक्तिर्नातिरिक्ता किं त्वीश्वरेच्छारूपा सा तु क्लृप्तैव एवं च शक्त्यनेरपि सतया तज्ज
न्योपस्थितेः शाब्दबोधानुकूलत्वमात्रमयापि कल्प्यत इति न धर्मिकल्पना या इति न्यायावता
रः।न चास्माच्छब्दादयमर्थो बोध्य इत्याकारकेश्वरेच्छा क्लृप्तैवेति वाच्यं।गंगापदात्तीरबोधोय
दित्नेश्वरेच्छायास्तादृशाकारत्वावश्यकत्वात् तस्याः सर्वविषयकत्वात् न च लाक्षणिकपदं
नानुभावकमिति गंगापदात्तीरबोधानुदयात् तादृशाकारत्वामावश्यकमेवेति वाच्यं।तथासति
गंगापदस्यानुभावकत्वे तादृशाकारकत्वे शक्यत्वापत्तेः।शक्यत्वे चाननुभावकत्वमित्यन्योन्याश्र
यादिति।अयतादृशेश्वरेच्छारितत्वं शक्तिः सा च न तीरे इति तत्र लक्षणैव।अत एवापभ्रंशेपि शक्तिभ्र

छये१ म

मद्धतिवेन्न ईश्वरोच्चरितत्वे हि नतत्कल्पनं अपभ्रंशादिसाधारण्यात् नन्वेवं वाच्याधुच्च
रितत्वे आधुनिकचैत्रादिपुरुषेणोद्भावितत्वाद्देशेह निर्मितानाम करोतीत्यादिना सामान्यतः
नामत्वेन तदुच्चारणोपपादनेनापभ्रंशितत्वेऽद्व्यादिनापभ्रंशत्वेन तदुच्चारणस्यापभ्रंशे
पिसत्वात् वैदिकपदस्यापि लाक्षणिकतया तादृशे छर्ये[illegible]रितत्वे सत्वात्। न च येपि
शक्तत्वात् [illegible]पत्तेश्चेति चेत् अत्राहुः। अपभ्रंशादपि शाब्दबोधोदयेनास्माच्छब्दादयमर्थो बोध
व्य इत्याकारकेश्वरेच्छाया अत्रापि सत्वान्न तो दृशावगमं वृच्छामात्रं शक्तिः। किंतु पदपदार्थसंबंधत
विशेषितासा तथा च तस्याः नानात्वीरादिसंबंधत्वे कल्पने गौरवात्॥ इच्छायाः संबंधत्वमाह कस
रिप्रयोगस्यानावाच्यत्वेन गंगापदतीरयोः संबंधत्वं किंतु प्रवाहसामीप्यस्यैवेति तीरे लक्षणैव
शक्तिरिति किं च पीवरे इति यत्र आरोपस्यापदकपदानामनंतत्वया विशिष्यानुपस्थितेर्येथे
४२ तरर्भेदमेवानुमानावेकं न तत्त्वधाकृतं पदं तथा घोषपदादेव तीरान्वये बोधोपपत्तेर्न गंगापदे ४१
तीरानुभावकमिति तथा च गंगापदात्तीरबोधो जायतामित्याकारकत्वमथासिद्धमेवेति। द्विक

ज्ञानस्यापरसंबंधि

लक्षणां निरूपयितुं पृच्छति। अथ केयमिति। शक्यात् गंगापदशक्यात् प्रवाहात्। अशक्यस्य
गंगापदाशक्यस्य तीरस्य उपस्थितिर्लक्षणेत्यर्थः। गंगापदेन शक्त्या प्रवाहोपस्थितौ तत्रान्वा
व्ययानुपपत्तिप्रतिसंधानानंतरं गंगापदात् पुनः स्मृतेन प्रवाहेण एकसंबंधिस्मारक
तयात्त्व तया एकसंबंधितीरमुपस्थाप्यते तथा च सैवोपस्थितिर्लक्षणेति भावः। पदज्ञानस्य पदार्थस्मा
रकता एव संबंधीस्मारकत्वया स्वसंबंधितीरमुपस्थाप्यते तथा चैवोपस्थितिर्लक्षणेति
भावः। पदज्ञानस्य पदार्थस्मारकता एवसंबंधी ज्ञानमपरसंबंधिस्मारकमिति रीत्या स च सं
बंधो वृत्तिरिच्छेन [illegible] तस्या उपस्थितिनिरूपकत्वमित्यर्थः। सैवेति उपस्थितिरेवेत्यर्थः। अशक्ये इति
गंगायां घोष इत्यत्र गंगापदाशक्ये तीरे तात्पर्यं गंगापदतात्पर्यं गंगापदात्तीरबोधो जाय
तामिति तीराविषयत्वं तीरे इच्छेव लक्षणेत्यर्थः॥ शक्यतात्पर्यस्य लक्षणत्वाकारणाया शक्ये
इति। अन्वये इति॥ घटमानयेत्यादौ घटकर्मत्वयोराधेयत्वरूपसंसर्गे तात्पर्यसत्वेन तात्पर्य
स्य लक्षणत्वस्यादित्यर्थः। न घेत्यादि। अन्वये न यावत्किं [illegible] लक्षणेति सिद्धांतेन व्याघातात्।
न च शक्यसंबंधस्य लक्षणत्वस्वीकारेप्येष दोषस्तदिति वाच्यं अन्वये शक्यसंबंधस्य

स्यसत्वेपि तस्य श्रोतृत शाब्दबोधानुपयोगित्वया तच्छाब्दबोधानुकूलस्य लक्षणस्य तत्राभावात् तत्र
न्यथा गंगापदस्य मुख्यपरत्वेपि शक्यसंबंधस्य तीरे सत्वात् लक्षणा कुत्रापि तीरे न लक्षणा
यास्तत्र स्वीकृत्वमिति वोपपेयमिति॥ तात्पर्यं लक्षणाबीजं चान्वयेतात्पर्यविषयशाब्दबोधानुकूलत्वेन
तच्च तच्छाब्दबोधोपयोगिलक्षणाया दुर्वारत्वादित्यवधेयं॥ नन्वशक्यपदार्थेन तात्पर्यस्य लक्षण
पदार्थत्वं च पदजन्यप्रतीतिविषयत्वं विषयता च प्रकारत्वादिना विशेष्यतान्यतररूपा तथा
च संसर्गस्य पदार्थत्वाभावादेव न दोष इत्यत आह। किंचेति केनात्पर्येति तत्पदार्थोपस्थि
तौ सत्यां शाब्दबोधे जाते तत्र तात्पर्यरूपतात्पर्यनिर्वाहसंभवतीति तात्पर्यानिरिक्ता
हन्निरवकाशमुपेयानहि स्वमेव स्वनिर्वाहकमिति भावः। ननु तेन शाब्दबोधनिर्वाहकत्वमेवो
पेयते न तु तात्पर्यनिर्वाहकत्वमत एवाह। शक्तेरपीति। तथा चापत्तेः। तात्पर्यात्मकत्वापत्तेरि
८२ त्यर्थः। तथा सति शक्तिलक्षणयोरभेदापत्तिः यदि च तात्पर्यसिद्धिर्निरिति प्रवादात्। तत्र ८२
चपंचम्यर्थान्वयानुपपत्त्या तन्निर्वाहकतया शक्तिस्तदतिरिक्ता तदा लक्षणायामपि

ऊह्यमिति भावः॥ अथ यद्यपीश्वरेच्छारूपशक्तेस्तात्पर्यात्मकत्वेऽप्यापत्तिरेव तथापि क्वचित्सामा
न्यतात्पर्यात्मकत्वापत्तिरिति बोध्यं। स्वशक्येति। स्वं लाक्षणिकं पदं। तस्य यच्छक्यं तत्संबंधो लक्ष
णेत्यर्थः। इदमेवोपपादयति॥ अस्तीति। गंगायां घोष इत्यादौ स्वं गंगापदं तच्छक्यः प्रवा
हस्तत्संबंधः। संयोगादिरूपस्तीरे स्तीति गंगापदस्य तीरे लक्षणेत्यर्थः। गौणीं तु स्वेतरत्वा
द्यमतत्वावच्छेदाय लक्षणायामेवं वदंतमपि दर्शयितुं लक्षणां विभजते। सा चेति। स्वश
संबंधरूपा लक्षणा चेत्यर्थः। तत्र गौणीं लक्षयति। स्वाश्रयेति तन्निष्ठ चेत स तितंतमूयो धर्म
वत्वं सादृश्यं। तद्वाचकः शक्यसंबंधो गौणीत्यर्थः। गौणीमुदाहरति। यथेति वाहीकः। वाहीकदे
शोद्भवः बलीवर्द इत्यर्थः। अत्र वाहीके गवामेदस्य बाधात् गोपदेन गोसदृशे लक्षणा गोसादृश्यं
च गोगततामूल्यमांद्यादिकमेवं तथा च जाड्यमेदस्य वाहीकस्य नितीशो बोधः। एवं च लक्षणायैवोप
पत्तौ गौण्याः पृथक् तिरिक्ता हर्निनोयेया लक्षणायामेवतदंतर्भावो दितिध्ययः। एवं सिंहो माणवक
इत्यत्रापि गौणी लक्षणया सिंहसदृशो माणवक इति सिंहसदृशाभिन्नो माणवक इत्यन्वयबोधो
ऽवसेयः। शुद्धां लक्षयति। तदन्येति। तदन्या सादृश्यान्य शक्यसंबंधरूपेत्यर्थः। शुद्धामुदाहर

रति। यथा आयुरिति ॥ आयुःपदस्यायुर्जनके लक्षणा तत्रायुः ॥ पदशक्यसंबंधो जनकत्वरूपो बोध्यः
तथा चायुर्जनकघृतं भुंक्त इति मिलितान्वयबोधः ॥ ननु शक्यादशक्योपस्थितिर्लक्षणेति प्राचीनमते
लाक्षणिकपदं नानुभावकमिति प्रवादः। संगच्छते स्वजन्योपस्थितिसंबंधेन पदस्यानुभावकत्वे तु
यागंगापदजन्यतीरोपस्थितेरभावात् गंगापदस्य तीरानुभावकत्वात् किंतु घोषपदस्यैव
तच्छाब्दं प्रति तदन्वयप्रतियोग्युपस्थापकपदत्वेन कारणत्वात् ॥ न च तच्छाब्दं प्रति तस्यानन्य
दजन्यपदार्थोपस्थितेर्हेतुत्वाच्च कथमेतदिति वाच्यं। तदर्थवाचकतत्पदनिरूपितशक्तिज्ञा
नजन्यतच्छाब्दबोधं प्रति तत्पदनिरूपितशक्तिज्ञानत्वेन हेतुत्वं तादृशलक्षणजन्यशाब्दबो
धं प्रति तादृशस्वरूपसत्पदार्थोपस्थितित्वेनैव हेतुत्वं न तु केनरूपेण हेतुहेतुमद्भावः ॥ श
५३ क्यसंबंधस्य लक्षणात्वे तु तीरोपस्थितेर्गंगापदजन्यत्वात्। अन्वयप्रतियोग्युपस्थापकतया ऽनुभा ५३
वकत्वसंभवत्येवेति तादृशप्रवादाविरोधः। अथ मन्मते गंगापदस्य शक्यसंबंधस्य तथा मनेनोप न
स्थितिः ॥ तन्मते तु पुनः शक्यस्मरणेन तस्मात् गौरिवेमिति। चेन्न गंगापदस्य स्वशक्यसंबंधेना

न्वयप्रतियोगिस्मारकत्वस्याक्षतत्वेन तत्र व्यभिचारवात्। स्मृतेन च गंगापदेन स्वसंबंधितीरस्मृ
२ तेरौचित्यादिति चेन्नैवं गंगापदात्तीरानुपस्थितौ प्रत्ययानां प्रकृत्यर्थान्वित स्वार्थबोधकत्वव्युत्प
त्तेर्गंगापदे प्रकृत्यर्थोपस्थाप्येति विना तस्यार्थान्वये ऽति प्रसंगादननुभवाच्च प्रकृति तात्पर्य
विषयेण स्वार्थान्वयबोधकत्वेऽपि तथा धूमोऽस्तीति का व्याख्यातात्पर्यविषयेण वह्निना धूमपदो
त्तरविभक्त्यर्थान्वयापत्तेः तस्मात् गंगापदस्यापि तीरस्मारकत्वमवश्यमुपेयं। एवं च लक्षणा शक्यसं
बंध एव तीरस्मारकत्वेन कल्पनेन तु शक्तिः तां विनाप्युपपत्तेः। तथा चान्वयप्रतियोग्युपस्था
पकत्वात्। ध्यारूपेण तस्याप्यनुभावकत्वोपपत्तिरविशिष्यते स्यादिपदानां स्वस्वशक्यानुभवे प्रति
वक्तार एवाङ्गीकारणीयं तत्पदार्थेन सह स्वशक्यानुभावकत्वे स्वशक्यानुभावकत्वेन लक्षणामात्रे
षपदादेव तीरानुभवसंभवात् लाक्षणिकपदस्य नानुभावकत्वमिति रीत्याकारणीयेति। वक्तृ
तस्तु उद्देश्यविधेयभावेन लाक्षणिकं नानुभावकमित्युक्तस्यार्थः। उद्देश्यविधेयभावेनापि
शक्तिमत्त्वस्यैव प्रयोजकत्वात् ॥ अत एव लक्षणार्थस्य विधेयतया ऽभानात् ॥

(शाब्दसंबंधस्य लक्षणत्वमतेतु शाब्दसंबंधस्य लक्षतावच्छेदकोभय)

विध्यर्थस्य च विधेयतयैव भानात् । न विधौ परः शब्दार्थ इत्ति संगच्छते किंच तत्र संयोगस्य
पटसंयोगहेतुत्वे तात्पर्यके तंतुः पटं करोतीति सर्वत्वादापत्तिबुद्धस्थले तथा नुभवापलाया
पत्तेर्लक्षणैकपदमप्यनुभावकमिति ॥ तादृशप्रवादो किंचिद्विचारः । यत्तु शक्या दशक्यो
पस्थितिर्लक्षणेति । मतेन तत्तावच्छेदकत्वेन लक्षणनास्तीति प्रवादव्याख्यानः शाब्दसंबंधस्य लक्षणीत्य
मतेतु शाब्द्य सवधम्र लक्षणत्वेन लक्ष्यतावच्छेदकोभयसाधारणस्यैकस्याभावान् तदुपपत्तेरिति तन्नामृतन्मते पियत्र ल
क्ष्यतावच्छेदकत्व लक्षोभयसाधारणः शाब्दसंबंधस्तत्रागतेः । तच्च तत्संस्थानत्वतिनियामक
संबंधेन तत्पस्य लक्षणत्वोपगमे ममापि लक्ष्यमात्रवृत्तिविषयतासंबंधेन तथोपस्थितेर्लक्षण
त्वोपगमादिति ॥ एतेन लक्ष्यतावच्छेदकत्वेन लक्षणनास्तीत्यस्य लक्ष्यतावच्छेदकवृत्ति शाब्दसं ४४
४४ बंधरूपलक्षणाग्रहेणापेक्षितत्वे तत्पर्यंः । यत्तु चोभयसाधारणः शाब्दसंबंधस्तत्र लक्ष
इत्विलेनैवतत्संबंधग्रहापेक्षातः तत्र लक्ष्यतावच्छेदकवृत्तित्वेनापि शक्यतावच्छेदकविशि
ष्टशक्तिग्रहात् शक्यतावच्छेदकेऽपि विशेषणविधया शक्तिज्ञानमपेक्षितमिति परास्तं ॥

लक्ष्यमात्रवृत्तिविषयतासंबंधेनोपस्थितेर्विशिष्टबोधप्रयोजकत्वस्य ममापि सुवचत्वादिति ॥ दृ
ष्टान्तबोधे ॥ शक्तिलक्षणज्ञानयोरेक एव कार्यकारणभावः ॥ तथाहि शक्तित्वावच्छिन्नसांसर्गि
कविषयतानिरूपितपदनिष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्यताकज्ञानत्वेन शाब्दबोधं प्र
ति कारणत्वं शक्तिसंबंधेन शाक्यसंबंधेन वा पदप्रकारकज्ञानं शक्तेः संसर्गत्वात् शक्तित्वनि
ष्ठावच्छेदकतापर्याप्तिः परं न निवेश्यते तेन शाक्यसंबंधेन पदप्रकारकज्ञानस्यापि संग्र
हः परं च पदप्रकारतानिरूपितशक्तिनिष्ठसांसर्गिकविषयतानार्थविशेष्यतानि
रूपितेति नस्येपितांशक्तिसंबंधेन पदाभावप्रकारकवाधबुद्धिप्रतिबध्यत्वं न लक्षणज्ञान
स्येति बोध्यं ॥ शक्यसंबंधस्याविनाभाव एवेति । प्राञ्चः तन्न । अंचाः । क्रोशंतीत्यत्रापि नानंतरा
पित्तसमयमादायाविनाभावोपपादनेपि किमन्येन शाक्यसंबंधमात्रस्यैव लक्षणत्वोचित्यात्
विनापि तबोधस्य तात्पर्यज्ञानाभावेनैव वारणीयः ॥ अनेकाविनाभूततत्त्वेष्येकतरभानं ता
त्पर्यज्ञानेवलादेवेति न वनोपितावस्त्वान् । मेउपं भोजयेत्यादौ रूढिर्विलक्षणेति । निमं
न्त्रकाः मंडपपदस्य गृहविशेषे रूढिर्मंडपानकर्तरि च योगारूढिः स्वतु समुदायशक्तिः योगः अ

त्रं बंधस्य लस्य

वयशक्तिः। न च रूढेर्योगापहारित्वेति वाच्यं तत्र अवयवशक्त्या मंडपानकर्तृबोधासंभवेन मंडप
पदस्य मंडपानकर्तरि लक्षणया इत्थं च रूढ्यर्थगृहसंबंधितावच्छेदकं तत्पागृहीतं चैत्रत्वादि
नाऽन्वयबोधो न तु मंडपानकर्तृत्वेनेति॥ पंकजमित्यादौ उपमस्य रूढ्यर्थस्य पंकजनिकर्तु
त्वस्य योगार्थस्याविरोधादवयवशक्त्यैव पंकजनिकर्तृबोधः॥ ननु शक्यार्थपरत्वे संभव
ति लक्षणाकल्पनमन्याय्यं॥ न च रूढेर्योगापहारान्न तथेति वाच्यं॥ कोयमपहारः। न तावद्योगा
र्थास्मृतिः रूढ्यर्थ इव योगिकेपि स्मारकसंबंधस्य शक्तेरुभयत्वात्॥ न च योगार्थस्य प्रथम
मस्मृतिः स इति वाच्यं॥ मंडपसमुदायेन यदा स्वार्थस्मरणं तदा अवयवार्थस्मरणबाधका
भावात्॥ लक्षणापक्षेपि रूढ्यर्थेन यदा स्वसंबंधिस्मरणं तदा अवयवार्थस्मरणसंभवेन योगा
र्थान्वयबोधसंभवाच्च न च स्मृतस्याप्यवयवार्थस्यान्वयबोधबहिर्भूतत्वमेव स इति वाच्यं॥
४५ अयोग्यतया रूढ्यर्थस्यान्वयबोधाभावेपि योगिकार्थबोधे बाधकाभावात्। अथ मंडपपदस्य ४५
णत्वेन स्त्रीरूपेण मातृबोधकैकरूपैवलक्षणया वा पितृत्वेमाता च पत्नी बोधकमिति
जनन्याः। श्वसुरावित्यत्र पत्नीजनकत्वेनबोधार्थं नतद्दादरात्। केचित्तु पितु मातापि

एतदुपरिपतितं ८ रूपआस्लणीत्वे ९

रयोर्निजपुंस्त्वस्य ब्राह्मणत्वव्यंजकतया ब्राह्मण्यां ब्राह्मणत्वाभावेन ब्राह्मण
त्वेन शक्यतानवच्छेदकत्वात् तद्बोधाभावाच्च क्षणेवं ॥ अत एव ब्राह्मणीवधे प्रायश्चित्ते सर्वत्रोक्त द्वा२
स्त्वर्ज ॥ पुंस्त्वघटितस्य तदवच्छेदकत्वे गौरवात् ॥ अप्रकृतब्राह्मणवधद्वयप्रायश्चि
त्तह्रासस्यान्यथाप्युपपत्तेरिति शिवौ नमस्कुर्यादित्यत्र शिवपदे शिवदुर्गान्य
तरत्वेन बोधकत्वं ॥ शास्त्रा शिवत्वेन लक्षणया च शिवाया बोधकमिति तु नव्याः ॥ भ्रा
तरौ पुत्रावित्यत्र भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विरूपैकशेषसत्वात् ॥ भ्रातृ
पदेन भ्रातृस्वसारौ सोदरत्वेन पुत्रपदेन चापत्यत्वेन पुत्रदुहितारौ लक्षणेने
हरानमस्याविशत्त्वान्नैव विष्णुसादिना बोधकं युगपद्वृत्तिद्वयविरोधानुपग
मात् ॥ एकस्यैव लक्षणया विष्णुसादिना बोधकमित्यथाहुः ॥ उपपदसमासे
कुम्भकारः क्षीरपायी स्वर्गभायी इत्यादौ धात्वर्थनामार्थयोर्भेदेनान्वयस्य व्युत्प १२

खद्वा

वि

त्पत्तिलक्षणया ऽऽकाङ्क्षादिपदानि कुम्भपयक्षीरकर्मकत्वक्रियाधिकरणकादिपराणि व्युत्प
त्तिसंकोचे तु शक्त्या कुम्भादिविषयकत्वादिसंबंधेनान्वयबोध इति ॥ कर्मधारये नीलो
त्पलमित्यादौ नीलाभिन्नमुत्पलमित्यभेदप्रकारको बोधः अनुभवसिद्धः । तत्र वैयाक
मते रणाः कर्मधारये शक्तिकल्पनासमासत्वेनैव साकल्ये तत्र नञ्विशेषणतः । कर्मधारय
त्वेनेति सर्वत्र समासे लक्षणा । अन्यमते तु नीलपदस्यैव नीलाभिन्ने लक्षणेति । मतद्व
यमपि निराचिद्धिषु सह ॥ नीलोत्पलमित्यादाविति । अन्वयविधयैवेति । संसर्गम र्यादि
र्यादाभेदोऽर्थः । एवकारेण प्रकारत्वव्यवच्छेदः ॥ येन तत्प्रकारकबोधोपपत्त्यर्थं अभे
दवृत्तिरपि कल्प्यमेतेति गावः ॥ नञ्नीलमुत्पलमित्यत्र संभवत्यर्थं साधुत्वे शाब्दसा
धुत्वमन्याय्यमिति न्यायेन न विशेषणविभक्तिप्रयोगः साधुः क्विंत्वनेदाधिकाः ॥ यु
क्तं चैतन्नीलमुत्पलमिति शाब्दसामग्रीकाले नीलाभेदाभाववदुत्पलमिति मानस
प्रत्यक्षादिवारणाय तत्र शाब्दसामग्र्याः पृथक् प्रतिबन्धकतायाः नवत्वावश्यकत्वात्
त्पर मते च नीलाभेदप्रकारकज्ञानस्य तत्र योग्यताज्ञानविधया

तस्यावश्यकत्वेनवीपरीतज्ञानोत्तरं प्रत्यक्षानिर्णयं प्रति विशेषदर्शनस्य हेतुतया तदभा
वादेव मानसवारणात् विशेषदर्शनस्य हेतुत्वे च तदभावव्याप्यवत्ता निर्णयरूपप्रतिबंध
सत्वेन शाब्दबोधस्यैवानुदयात् तादृशशाब्दसामग्र्याः प्रतिबंधकताघितबोधतया बा
धसामग्री प्रतिबंधतयैव क्लृप्तया तद्वारणात् ॥ न च मन्मते पि नीलस्याभेदसंबंधेनान्व
यस्वीकारे तादृशसामग्रीकाले अभेदसंबंधावच्छिन्नप्रतियोगिताकनीलाभाववदुत्प
लमिति ॥ प्रत्यक्षोदयस्तु स्यादेव विशेषदर्शनाभावादेव निर्वाह इति वाच्यं । तथा
पि अभेदप्रकारकबोधस्वीकारेपि भेदे नीलस्य निरूपितसंबंधेन भानेन तया नील
मुत्पलमिति शाब्दसामग्रीकाले निरूपितत्वसंबंधेन नीलाभाववानुत्पल इत्यादि
प्रत्यक्षे प्रतिबंधकत्वांतरास्वीकारात् [illegible] इति विशेषणविभक्तेरभेदोर्थः ॥ एवं च
नीलोत्पलमित्यत्रापि अभेदे लक्षणा आवश्यकी व्याससमासयोः समानाकारकज्ञान
जनकत्वनियमात् । समानार्थकसमासारंभकवाक्यस्यैव विग्रहत्वात् । न चैवं नीला
भेदस्यान्वय उत्पलेन्वयः ॥ नामार्थयोर्भेदेनान्वयाभावादिति वाच्यं । समासातिरि ७२

पि३

क्तस्थल एव तन्नियमादित्यत आह ॥ अत एवेति ॥ यत एव कर्मधारयेन समासस्य
न शक्तिर्नवा लक्षणा अत एवेत्यर्थः । वनीयानिति । कर्मधारये यदि समासस्यैन
शक्तिः तर्हि तत्पुरुषे शक्तिरेवेति तत्पुरुषाद्युपस्थितव्याघातः । यदि च कर्मधार
ये लक्षणा तर्हि तत्पुरुषेपि सेति उभयथापि वनीयस्त्वव्याघात इति कर्मधारयेत्व
ना केत्यान च विशेषणविभक्तेरभेदार्थकत्वमते व्याससमासयोः समानार्थकत्वानुरोधा
दभेदे लक्षणावश्यकी तु कमिति वाच्यं । आकृत्यानर इत्यत्र व्यभिचारेण तादृशनि
यमाभावात् । तदिदमुक्तमभेदस्यान्वयविधयैव भानोपपत्तेरिति ॥ ननु राज
पुरुष इत्यत्रापि संबंधलक्षणानुपपत्तिः व्याससमासयोः समानार्थकत्वनिय
मानुरोधेनैव तत्कल्पनात् ॥ नामार्थयोरिति तत्पुरुषसमासातिरिक्तस्थल एव
अन्यथा संबंधलक्षणायानिर्वाहादित्यत आह ॥ तत्र हीति । तत्पुरुषे हीत्यर्थः
पूर्वपदे राजपदे तादृशनियमाभावेपि संबंधप्रकारकबोधस्यानुभवसिद्धत्वात्

संबंधेलक्षणाकर्मधारयेऽत्रनैवमितिभावः।ननुसंबंधप्रकारकानुभवश्चेदुभय
त्रापितुल्यः।नास्तिचेदुभयत्रापिमास्तु।इत्यनुभवेविवादइत्यतआह।संबंधि
लक्षणेसुकरमितिं।युक्तिसंकोचेमानाभावात्समासासमासयोः।सर्वत्रापिना
मार्थयोरभेदेनान्वयाद्राजपदस्यराजसंबंधिनिलक्षणानीलस्यचाभेदेनैवो
त्पलेऽन्वयान्नव्युत्पत्तिविरोधइतिकर्मधारयेलक्षणाकल्पनमितिभावः।नच
तत्पुरुषात्कर्मधारयस्यबलीयस्त्वमेवासिद्धमितिवाच्यं।निषादस्थपत्यधिक
रणविरोधापत्तेः।तथाहि।एतयैवनिषादस्थपतिंयाजयेदित्यत्रनिषादःस्थपति
र्यस्येतिबहुव्रीहिस्वीकारेउभयपदलाक्षणिकतयागौरवात्।तस्येतरपद
लाक्षणिकतत्पुरुषस्यैवलघुत्वादिति।निषादानांस्थपतिरितिवानिषाद
श्चासौस्थपतिश्चेतिवासमासः।तत्रषष्ठीतत्पुरुषस्वीकारेनामार्थयोरभेदेनान्वय ७४
भावेननिषादपदस्यनिषादसंबंधिनिलक्षणावश्यकतयागौ
ल्पभतेपिपुरःस्फूर्तिकत्वपमपदलाक्षणिकत्व

रवं।कर्मधारयेतुनतदितितदपेक्षयालघुत्वात्कर्मधारयइतिसिद्धांतः।तस्यचकर्म
धारयेपिलक्षणाकल्पनेव्याघातः।नचनिषादस्यसंकरजातीयत्वेनतस्या
गोपयुक्तापूर्वविद्याप्रयुक्तेकल्पनेगौरवं।स्त्रीशूद्रौनाधीयतामित्यत्रसंकोचक नि
ल्पनंचेतितदपेक्ष्यतत्पुरुषएवसाधुः।नचात्रशूद्रपदस्यनिषादेतरशूद्रप
रतयासंकोचेनिषादस्यवेदांतराध्ययनप्रसंगः।अध्ययनपदस्ययागोपयु
क्ताध्ययनेतरपरत्वेचशूद्रांतरस्यापियागोपयुक्ताध्ययनेप्रसंगइतिवाच्यं। ५
विशेषतः।आहिताध्ययनपरत्वादध्ययनपदस्यतेननिषादस्ययागोपयुक्त
वेदेतरवेदनिषेधःशूद्रेतरस्यतुयावद्वेदाध्ययनेनतस्यविशेषतः।आध्या
यादितिचेत्।नैवंलाघवात्कर्मधारयेप्रकृतेउत्तरत्रैवर्णिकविद्याप्रयुक्तिकल्प
नस्यफलमुखत्वेनाप्यप्रत्यात्।।तर्हिगौरवस्याप्रतिबंधकत्वात्।कर्म

धार्ये पि लक्षणा । कल्पनेतु तत्पुरुषापेक्षया लघुत्वाभावेन पूर्वविधाप्रयुक्ति
कल्पनगौरवेण स्तत्वेन च तत्र कर्मधारयस्वीकारः अनर्थक एव स्यात् तत्र ल
क्षणां न स्वीकार एव साधुः ॥ ननु लक्षणया अभावेपि कर्मधारय एव स्वीक्रिय प
तेन तत्पुरुषः तत्र बीजाभावः । शक्तिलक्षणाज्ञानयोः शाब्दबोधहेतुतायां
विशेषाभावात् ॥ न च तु स्वार्थपरत्वे संभवति लक्ष्यार्थपरतापि अन्याय्य पा॰न्य॰
त्वादिति न्याय एव शरणमिति वाच्यं । असति विशेषतो बाधके कर्मधारयवि
धेयैव वेदानां प्रामाण्ये न तु तत्पुरुषविषयापीति भवन्मतेपि सुवचत्वात्
तस्मात् कर्मधारये समासत्वेन शक्तेः लक्षणीतया वा स्वीकारेपि वक्तीयस्त्व
७५ मुपपादयितुं शक्यत एवेति चेन्न । शक्यसंबंधरूपलक्षणाज्ञानस्य चिनाशक्ति ७५
ज्ञानमनंगीकृतया शक्तिज्ञानादेव शाब्दबोधोपपत्तौ लक्षणाज्ञानकल्पने गौरवादिति

वैदिकशाब्दबोधस्य शक्तिज्ञानजन्यत्वे लाघवस्यैव सिद्धांतबीजत्वादिति सं॰।
पल्लवितेन ॥ ननु तथापि चित्रगुधनमित्यत्र बहुव्रीहिगर्भतत्पुरुषस्थले बहुव्री
हौ लक्षणोत्तरं तत्पुरुषे लक्षणास्वीकारे लक्षितलक्षणास्वीकारापत्तिः । बहुव्री
हेरन्यपदार्थसंबंधिनि अनुशासनाभावात् परंपरासंबंधेनैव लक्षणायाः
निर्वाहाद्बहुव्रीहौ शक्तिस्वीकारस्य व्यर्थकतया समासत्वेन सर्वत्रैव समासे तच्छक्ते
नमिति चेन्न । चित्रगुपदस्य बहुव्रीहिलक्षणयाऽन्यपदार्थपरत्वे तत्संबंधिनि प
रंपरासंबंधेन तत्पुरुषलक्षणायां च लक्षणद्वयादेव युगपदन्वयबोधोपपत्तेः
युगपद्वृत्तिद्वयविरोधस्य च मणिकृन्मतेऽनंगीकारादिति । अघटः पट इति
नञ्तत्पुरुषे घटभिन्नः पट इत्यन्वयबोधस्यानुभाविकत्वात् । नञ्संस
र्गाभावमात्रवाचकत्वेन तत्रान्योन्याभावत्वप्रकारकबोधस्यासंभवि

=पन्योन्याभावत्वं

तथा घटभिन्नेस मास शक्तिरिति मतं दूषयति ॥ नञ्तत्पुरुषे पीति ॥ घटस्यसं
बंधिपरमिति । घटसंबंधिभिन्नाद्वेशिच्छमित्यर्थः संबंधश्चात्र प्रतियोगित्वं ॥
अनन्यलभ्यस्यैव शब्दार्थत्वान्न तत्र शक्तिरिति भावः । कथं तर्हि अन्योन्याभाव
त्वप्रकारको बोध इत्यत आह नञ्पदं चेति ननु संसर्गाभावो न्योन्याभावश्च
नञोर्थ इति संसर्गाभावत्वं च शक्यतावच्छेदकमिति नञ्पदस्य नानार्थत्वं कल्प
नापि द्वयान्योन्याभावे भावत्वैलक्षण्ये बोधितानन्यलभ्यस्यैव शब्दार्थत्वादित्यपि
प्रायेणहि संसर्गेति ॥ अत्यंताभावमात्रवाचकत्वे घटप्रागभावदशायां कपाले
घटो नास्तीति बुद्धेरनुदयप्रसंगः । ध्वंसप्रागभावप्रतियोगिभिः त्रिभिः सह
अत्यंताभावस्य प्राचां मते विरोधादत्यंताभावविषयकत्वासंभवात् अतः ध्वं १६
सादिविषयकत्वमेवोपेयं । तथा च तत्साधारण्याय संसर्गाभावेति । संसर्गा

घटध्वंसदशायां

भावत्वं च संसर्गारोपजन्यप्रतीतिविषयीभूताभावत्वं ध्वंसप्रागभावदशायां क
पाले घटो नास्तीति धीर्ध्वंसादिविषयिणी तत्र चोत्तरकालीनत्वविशिष्टस
मवायः प्रागभावस्य पूर्वकालीनत्वविशिष्टसमवायश्च ध्वंसस्य प्रतियोगिता
वच्छेदकः संबंधः । प्रसक्तं हि प्रतिषिध्यत इति न्यायात् तदुत्पत्तिपूर्वं उत्तरकालीन
त्वविशिष्टसमवायेन कपाले घटस्याभावात् । तत्र तेन संबंधेन कपाले घटोस्ती
ति संसर्गारोपानंतरं घटो नास्तीति बुद्धिः एवं ध्वंसदशायां पूर्वकालीनत्वविशि
ष्टसमवायेन घटस्याभावात् । तेन संबंधेन कपाले घटोस्तीति संसर्गारोपा
नंतरं घटो नास्तीति बुद्धिः अत्यंताभावे तु संयोगमात्रेणैव घटवत्तारोपादत्यंता
भावधीः न चान्योन्याभावप्रसक्तेनादात्म्यारोपस्य हेतुतया तादात्म्यस्यापि संसर्गे
त्वेनान्योन्याभावेतिव्याप्तिरिति वाच्यं । संयोगादिसंबंधएव भूरिप्रयोगात् संयो
गादिष्वेव संसर्गव्यवहारात् ॥ तदात्म्यातिरिक्तत्वेन संसर्गस्य विशेषणात् ॥ नच

तथा पिनेत्याकारकाभावप्रत्यक्षे वारणायाभाव लौकिकप्रत्यक्षे प्रतियोगिज्ञानहेतुतायां
आवश्यकत्वे पि प्रतियोगिसंसर्गारोपहेतुत्वे मानाभावः। इति यावत्। एवं च दानाना
संबंधावछिन्नाभावप्रत्यक्षवारणाय तत्तत्संबंधावछिन्नाभावप्रत्यक्षे तत्तत्संस
र्गारोपस्यापि हेतुत्वात्॥ न च ध्वंसप्रागभावयोः प्रतियोगितावछेदकसंबंधेना
नाभावेन कथं तत्प्रत्यक्षे प्रतियोगिसंसर्गारोपः कारणमिति याच्यं। अनुभवबलेन
प्रतियत्प्रवृत्तिविंघदभावानुरोधेन चात्यंताभावस्येव तयोरपि प्रतियोगितावछे
दकसंबंधांगीकारात्। तथाहि। अत्यंताभावस्येव ध्वंसप्रागभावयोरपि तादृशा
यां तत्कालावछेदेन प्रतियोगिमत्ताज्ञानानुदयात्। समवायेन तद्घटत्वावछि ७१
न्नप्रतियोगिताकात्यंताभावप्रागभावादिमत्तात्वनादिना प्रतिबंधकत्वे
त्र्यमपेक्ष्यसमवायेन तद्घटत्वावछिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेनैव
प्रतिबंधकतयात्यंताभावस्येव तयोरपि संबंधावछिन्नविशेषधर्मावछिन्नप्रति
४ तद्‌घटत्वनाशानं प्राति तद्

योगिताकत्वस्वीकारात्। तथा च संसर्गाभावत्वं न अशक्यतावछेदकं। न चान्योन्या
भावत्वमेव तथास्त्विति वाच्यं। सामान्यपदस्य तत्र चिन्मायेन ध्वंसप्रागभावादि
साधारणतया संसर्गाभावत्वस्येव तथात्वात्॥ न घटः पट इत्यादौ समानाधिकरणा
नुरोधादन्योन्याभाववत्तिलक्षणयान्योन्याभावविशात्मानं गे; अयोगाभावाद्वे चैत्रोन
पचति। नेदं चैत्रस्यकृतत्वेन घटइत्यादौ चन्मतो नञो मुख्यार्थत्वासंभवादित्याश
यः। लाघवेनेति। संसर्गाभावत्वे संसर्गारोपजन्यप्रतीतिविषयाभावत्वे संसर्गा
रोपस्य हि अनाहार्यस्य हेतुत्वे; नाहार्यबाधबुद्धेः प्रतिबंधकतयाभावप्रत्यक्षा
नुपपत्तिः; आहार्यत्वं च तत्प्रचतदानीं बाधाभावेनासंभवः; बाधकालीनेछाज
न्यज्ञानस्यैवाहार्यत्वात्॥ यदि च बाधसामग्रीकालीनस्याप्याहार्यत्वमिति
मन्यते तथाप्यभावलौकिकप्रत्यक्षे एव प्रतियोगीसंसर्गारोपस्य हेतुतया
तीद्रियाभावाव्याप्तिः। न च संसर्गावछिन्नप्रतियोगितां [redacted] तदा संयो
काभावत्वं १

ऽप्यन्योन्याभावेऽतिव्याप्तिः संयोगितादात्म्यस्य संयोगरूपत्वेन तस्यापि संसर्गावच्छि-
न्नप्रतियोगिताकत्वात् ॥ संसर्गतया तादात्म्यतया चावच्छेदकतावैलक्षण्यं दुर्व-
चं । एवं तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वं नान्योन्याभावत्वं संयोगसंबंधाव-
च्छिन्नप्रतियोगिताकसंयोगपत्वं ताभावेऽतिव्याप्तिः । संयोगितादात्म्यस्य संयो-
गरूपतया तादात्म्यावच्छिन्नप्रतियोगिताकत्वात् ॥ तादात्म्यत्वेन तादात्म्यावच्छिन्न-
त्वोक्तौ च तादात्म्यत्वस्यातिरिक्तत्वोपगम एव निस्तार इति संसर्गाभावत्वान्योन्याभा-
वत्वादिकमखंडमेवेति किं तदपेक्ष्याभावत्वे लाघवं । नञ्समानाधिकरणत्वादभावत्वं ज-
ातिर्वाच्यं । सा सामान्यधर्मस्य हि अवच्छेदकत्वेन नञ्पदाच्छक्तेर्वाभावबोधोपप-
त्तौ लक्षणां विनैवोपपत्तिरिति तस्यैव बीजनया संसर्गाभावत्वादीनामखंडत्वेन नञ्-
पदात्संसर्गाभावत्वप्रकारकबोधस्तत्राभावत्वप्रकारकबोधस्य कल्प्यस्त-
त्वेन प्रकृते तदसंभवादित्यत आह । विनिगमनेति । संसर्गाभावत्वस्यातिरिक्त- १८

त्वेऽभावत्वस्य व्यतिरिक्तत्वेन तदपि शक्यतावच्छेदकमित्यर्थः । अभावमात्र एव ।
संसर्गाभावेऽन्योन्याभावे चेत्यर्थः । तच्छक्यत्वेति । नञ्शक्यत्वावधारणादित्यर्थः ।
इति संप्रदायानुसारिण्या व्याख्या वस्कृतस्फु ॥ ननु अभावत्वस्य नञ्शक्य-
तावच्छेदकत्वे घटो नास्तीत्यत्र संसर्गाभावत्वप्रकारकोबोधः । घटो नेत्यादौ ।
अन्योन्याभावत्वप्रकारकोबोधः । कथं स्यात् । यदि च संसर्गावच्छिन्नप्रतियो-
गितासंसर्गकाभावविषयशाब्दत्वादेः कार्यतावच्छेदकत्वं तदा तादृशानुभवोपप-
त्तिरिति विभाव्यते तथापि अभावत्वप्रतीतेरवश्यकत्वात् तस्यां भावत्वघटितसा-
दिविषयकत्वे नैवोपपत्ताव अतिरिक्ताभावत्वे मानाभावः त्तिनाभावत्वं शक्यताव-
च्छेदकमतं आह । विनिगमनेति । संसर्गाभावत्वमिवान्योन्याभावत्वमपि श-
क्यतावच्छेदके विनिगमनाविरहादिति भावः । भूरिप्रयोगस्यासंसर्गाभावत्व

वान्योन्याभावेपिसत्वात् नियमतः प्रतीयमानेप्यर्थेशक्त्यस्वीकारेनानार्थत्वाप
त्तेः। नपचतीत्यादौ वैयाकरणमतेकृत्तुवाच्यतयास्माकमपियत्नाख्यातेकृ
तेरिलक्षणातदाशक्त्यैवान्योन्याभावस्यनञोभृत्यायनसीमवादितिनव्या
नुसारिणीमार्गाख्येतिविभावनीयं॥ यदिचघटोनास्तीत्यत्रात्यंताभावत्वप्र
कारकएवबोधः आनुभविकः ध्वंसप्रागभावयोरत्यंताभावविरोधित्वेना
त्यंताभावेन ध्वंसप्रागभावकालेघटोनास्तीतिबुद्धेरत्यंताभावविषयकत्वेनै
वोपपत्तेरितिभाव्यतेतत्रापिचात्यंताभावत्वेनान्योन्याभावत्वंचशक्यतावच्छेदक
७२ मितिमंतव्यं। अत्रचघटवृत्तिनन्तजेचैयत्किंचिद्घटप्रतियोगिकोकात्यंता
भावसत्वातन्नतत्वेघटोनास्तीतिबुध्यापत्तिवारणायन्वयितावच्छेदकाव ७६

च्छिन्नप्रतियोगिताकत्वंयुक्तमितिवक्तव्यं॥ तत्रघटत्वावच्छिन्नप्रतियोगि
ताकाभावविषयकशाब्दत्वावच्छिन्नंप्रतिकिंचित्पदसमभिव्याहृतघटपद
समभिव्याहृतनञ्पदज्ञानत्वेनकारणता। तेननीलोघटोनास्तीत्यत्रनघटत्वा
वच्छिन्नाभावधीः किंचित्पदंचनीलादिपदत्वेनविशिष्योपादेयं। तेनअनन्तजा
दिपदसमभिव्याहारेपिनदोषः। नचनथापिनीलघटोनास्तीत्यत्रानुपपत्तिः
अभेदेननीलादिमांकोदत्वेनानान्वितेतितदर्थान्वयः॥ कंबुग्रीवादिमान्नास्तीत्या
दौतुसंभवतिलघौगुरौतदभावादितिन्यायेनकंबुग्रीवादिमत्वस्यघ
टत्वापेक्षयागुरुत्वेननवच्छेदकतयाकंबुग्रीवादिमत्वावच्छिन्नप्रतियोगि
ताकाभावबोधोप्यमात्मकएव। यद्यपिकंबुग्रीवाद्यवच्छिन्नप्रतियोगिताकत्व
स्यप्रामाण्यात्तेनसंबंधेनकंबुग्रीवादिमतोनाभावोपरिच्छिन्नमर्यादा। पिसांस

[illegible] घटत्वावच्छिन्नप्रतियोगि
र्मिकविषयताया मपिप्रकारताविशेष्यतावोपगमेन प्रतियोगितायां केवुद्धी तावत्त्व
वावच्छिन्नत्वांशे भ्रम इति बोध्यं ॥ केचित्तु घटो नास्तीत्यादौ प्रतियोगितया घट वच्छे
स्यात्त्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन केवुद्धी वादिमतस्याभावोपरि भ्रमः न ३
स्यावच्छिन्नप्रतियोगिताकत्वस्यैव स्वस्य संबंधत्वादित्याहुः ॥ आशायमविश्वा
८८ न्नृशं कृतेनेनानुनयंति । अभावघटयोरिति ॥ प्रतियोगितया घटस्याभावोप
रिबोधोपपत्तेरित्यर्थः ॥ घटपदेति । अपिनानञ्पदसमुच्चयः । नामार्थयो
रिति ॥ नीलो घट इत्यत्र नीलघटयोरभेदेनान्वयोऽभेदेनेति ॥ अभेदातिर
रिक्तसंबंधेनेत्यर्थः । तथा च नञर्थाभावे प्रतियोगितासंबंधेन घटस्या
८० न्वयो न संभवति तु नञ्युक्तत्वेनान्योपि नामत्वादिति भावः ॥ कथं तर्हीति । ८०
नामार्थयोरिति व्युत्पत्तिस्वीकारे हीत्यर्थः ॥ नघट इति प्रथमाभाः साधुत्वान्न प्रति

योगितासंबंधेनैव नञर्थान्योन्याभावे घटस्यान्वय इति भावः ॥ अर्थसाधुत्वेऽसं
भवति शब्दसाधुत्वस्यान्याय्यतया प्रथमायामेकवचनमाह ॥ प्रथमायां वेति
षष्ठ्यर्थे प्रतियोगित्वेन नु सुधिकौल इत्याह संभवति । कर्तृकर्मणोः कृतीति
व्यत्ययानुशासनवैयर्थ्यापत्तेः कर्तृत्वकर्मत्वप्रकारकबोधस्य षष्ठ्यास्त
धर्मविशेषविवक्षणे एवोपपादयितुं शक्यत्वादित्यभिप्रायेणाशंकते । नन्वि
ति । तर्हि कुत्रचित्कौलक्षणे नेगकारे हि षष्ठीतः भारतस्य श्रवणं व्यासस्य
कृतिरिति कर्मत्वे योगे विहितषष्ठिः । कर्मेति । कर्तृत्वेनापि बोध्यं ॥
शेषषष्ठीत्वनेन संबंधमात्रशक्तषष्ठीतः संबंधत्वेन बोधसंभवेपि कर्म
त्वत्वेन बोधो न संभवतीति तथानुभवोपपत्तये लक्षणास्वीकारश्चावश्य
कः ॥ न चानुशासनस्य शक्तिनिर्णायकतया कर्तृकर्मत्वयोगविहितष

हीत्वेन कर्तृत्वत्वादिना शक्तिरेवास्तामिति वाच्यं। अनन्यलभ्यस्य शब्दार्थ
त्वादिति भावः॥ असंदिग्धं स्थलमुदाहरति। कथं चेति। एकस्यां स्त्री व्यक्तौ
दारा इतीति दाराः पुंसि चेत्यनुशासनेनेति बहुवचनांत एव दारशब्दः साधुरि
ति भावः। यद्यपि प्रकृतेऽप्यर्थे इति संख्यावाचकत्वं सुपां न तु तन्नोद्देशे इति संख्या
वाचकत्वमिति नियम तद्गुणानादाय बहुत्वान्वयः संभवत्येव तथापि एकोऽध
टाः इत्यत्रापि असाधुत्वज्ञानाभावदशायां घटगत गुणानादाय बहुत्वान्व
यापत्तिः न च भवन्मतेऽपि बहुवचनेन लक्षणया एकत्वं बोध्यतामिति वा
च्यं॥ एकः इति पदेनैकत्वबोधसंभवे घटाः इति बहुवचनस्यैकत्वे तात्प
८१ र्यग्रहेण लक्षणया एकत्वबोधकारणाभावात्॥ प्रकृते च संभवत्यर्थ ८१
साधुत्वेऽशब्दसाधुत्वस्यानाख्यत्वादिति॥ आनुशासनिकीति। इयं लक्ष

णा यं षष्ठ्याः कर्मत्वे बहुवचनस्य चैकत्वे लक्षणेत्यर्थः॥ दृष्टैवेति। कर्तृकर्मणोः कृ
ती ति इत्यनुशासनवैयर्थ्यमिति यावत्। विभक्तौ न लक्षणेत्यस्यानुशासित विभक्त्य
र्थातिरिक्तेन लक्षणेत्यर्थः। तदर्थं इति भावः। तस्य श्रवणमित्यादौ विभक्तौ लक्ष
णोपपत्तावपि न घटः पटः इत्यत्र प्रथमायां कथं लक्षणा तथानुशासनाभावादि
ति भावः। प्रकृतेऽपि नञ्समभिव्याहृत घटपदोत्तरप्रथमायामपि अनुशासनमिति
कीलक्षणा संभवतीति ज्ञाप्यमित्यर्थः। अनुशासनमेवाह॥ नदिदमाहुरिति
नियतेति नियतः। प्रतियोगिवाचकपदेनानीयतः प्रयोगो येषां ते केचि
दव्ययाः नञादिरूपाः प्रतियोगिवाचकपदार्थान्विते स्वार्थबोधकाः केचि
दव्ययाः इति यावत्। न इतिनं कदाचिदपि प्रयोगं किंतु न घटः पटः इत्यादि
रूप एव तथा च स्वार्थे प्रतियोगिवाचकपदार्थान्वितत्वं अभेदेन विभक्त्यर्थ

हि२

द्वारा वा तन्त्रेचेद्घटप्रतियोगिकत्वलक्षणायां अभेदेन प्रथमार्थः प्रतियोगित्वेलक्ष
णायां तु विभक्त्यर्थद्वाराऽन्वयः ।। घटपदे लक्षणायां प्रथमायाः साधुत्वमा
त्रकृत्यमपेक्षया प्रथमाया एव प्रतियोगित्वेलक्षणोचितेत्यत्रापि प्रतियोगि
त्वेलक्षणाया आनुशासिनिकत्वमिति भावः । यद्यपि प्रतियोगित्वरूपार्थे प्रथमे
ति न व्याकरणेति नमस्ति यादितं तथापि तादृशानुशासनतात्पर्यं तत्रैवेत्यनु
शासितत्वमिति ध्येयं ।। शंकते । तथापीति । नञर्थेति ।। न घटः पट इत्यत्र घटान्यो
न्याभावस्य पटे कथमन्वयः ।। नामार्थयोरभेदः भिन्नविभक्तिकसंबंधेनान्वयबोधा
संभवादित्यर्थः ।। शंकते । नञर्थेति ।। तथा च न नामार्थयोरन्वयः किंतु विभक्त्य
र्थनामार्थयोरिति भावः ।। तत्र इति न घटः पट इति वाक्यादित्यर्थः ।। शंकते नन
ञ्पदादिति ।। नञर्थस्याभाववतः पटेऽभेदेनैवान्वय इति नैतद्युक्तमिति वि ८२

रोध इति भावः ।। घटस्येति । नञोऽभाववति लक्षणायां घटस्य प्रतियोगितासंबंधे
नाभावेऽन्वयो वाच्यः सच न संभवतीति भावः ।। तदेवाह ।। तस्येति । अभावस्ये
त्यर्थः । पदार्थेनेति ।। नञो अभावत्वदर्थकतयाभावस्यैकदेशत्वादित्यर्थः ।। गौर्नि
त्यापशुरपशुरित्यादौ सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः ।।
सति विशेष्ये बाधे इति न्यायेन स्वर्गाद्ध्वंस इतिवन्नित्यत्वगोत्वेऽन्वयापशप सू ५
पदार्थः ।। पदार्थेनान्वेति नतु पदार्थैकदेशेनेति नियमस्यावश्यकतया न
ञर्थाभाववदेकदेशाभावे घटस्य प्रतियोगितयाऽन्वयासंभव इति भाव
। तथापीति । शंकोपरि समाधत्ते नैवमिति ।। समसंबंधिके । नामार्थयो
रिति व्युत्पत्तेः ।। नञोऽभाववति लक्षणे च अभाववतस्तदभेदेनैव पटेऽन्वय
इति न नामार्थयोरिति व्युत्पत्तिविरोधः ।। पदार्थः पदार्थेनान्वेति ।। नत्व

पदार्थैकदेशेनेतिव्युत्पत्तेश्च ससंसर्गसंबंधिपदार्थातिरिक्तस्थल एवाभ्युपग
मात् ।। नन्वर्थाभाववदेकदेशेऽप्यभावे घटस्यान्वये बाधकाभावइत्तिभावः
ननु व्युत्पत्तेः संकोचे प्रमाणाभावइत्यतआह ।। यथेति । जनकत्वेइति । जनकपुंस्त्व
विशिष्टत्वं तत्रैकदेशे जनकत्वे यथा चैत्रस्य निरूपितत्वसंबंधेनान्वय
इत्यर्थः ।। तथा च व्युत्पत्तेः संकोच आवश्यकइतिभावः ।। ननु चैत्रस्य पि
तेत्यादौ जनकपुंस्त्वरूपपितृत्वैकदेशे जनकत्वे चैत्रस्यान्वयः । किंतु स्वनि
रूपितजनकत्वसंबंधेन पितृपदार्थ एवेति न पदार्थः । पदार्थेनान्वेतीति
व्युत्पत्तिसंकोचः ।। एवं च भूतले पि घटो नेत्यादौ घटपदस्य घटप्रतियोगिकत्वे
लक्षणायां तु घटस्य प्रतियोगित्वस्य स्वाभिन्नाभावाश्रयतासंबंधेन प्रथमा ८३
याः प्रतियोगित्वे लक्षणायां तु घटस्य स्वप्रतियोगिताकाभावाश्रयतासंबंधे

नपदेऽ न्वये बाधकाभावइतिमतं दर्शयति ।। अन्येत्विति । समुदाय एवेत्यभाववत्त्वेनैव एवं
कारेणाभावरूपपदार्थैकदेशव्युदासः । इतरपदार्थेति । घटादिरूपपदार्था
न्वयः । परंपरासंबंधेन स्वाभिन्नाभावाश्रयत्वसंबंधेन स्वप्रतियोगिताका
भावाश्रयत्वसंबंधेन वेत्यर्थः ।। न च नामार्थयोरिति व्युत्पत्तिभंग इति वाच्यं ।।
नामार्थयोरभेदाघटितसंबंधेन विभक्त्यर्थाघटितसंबंधेन वान्वय
इत्येव व्युत्पत्तिरिति भावः । एवं चैत्रस्य पितेत्यादौ चैत्रस्य स्वनिरूपितजनक
त्वसंबंधेन पितर्येवान्वय इति बोध्यं ।। अंकुरित्यस्य च रसोऽभावनंतद्बीजं तु घ
टियाभाववान् पट इत्यन्वये कस्याभावस्याकांक्षाया अनिवृत्तिः । अननुभव
श्चेति ।। ननु अभाववत्त्विलक्षणांगीकारे पदार्थैकदेशेनैवान्मते संकोचः ।।
नन्वर्थाभावस्याश्रयतासंबंधेन पटेऽन्वये नामार्थयोरित्यस्य संकोच इत्यत

कुम्भत्वेकिमिति अभावप्रतिलक्षणाघटपदस्य घटप्रतियोगिकेन यस्याभावधर्मा
लक्षणायां लक्षणाद्वयप्रसंगश्चेत्तत्राह। युक्तं चेति। युक्तमिति संकोचस्यावि
शिष्टत्वेपीति शेषः। लक्षकस्यैव पदेन पदस्येति शेषः। अन्यथानञोऽभावव
ति लक्षणाकल्पने। अघटमिति विशेषणविशेष्यवाचकपदयोः समानविभक्ति
कत्वस्यविरुद्धविभक्तिराहित्यस्य वा भेदान्वयबोधहेतुत्वेन नञन्तेऽभावस्यै
वाश्रयतयाऽन्वयेनाभेदान्वयबोधाभावेन प्रतियोग्यनुयोगिनाचकपदयोः
समानविभक्तिकत्वमनुपपन्नमित्यादित्यर्थः निपातेति। निपातादित्यर्थः। आदि पा
नाऽव्ययपरिग्रहः। अन्येवेति। अव्ययनिपातातिरिक्ते नामार्थयोरन्वये न्वय
बोधाभावइत्यर्थः नामार्थप्रकारकशाब्दबोधेऽव्ययनिपातप्रत्ययाद्यन्यतमजन्यो ८४
पस्थितेर्हेतुत्वादित्यर्थः। नञस्तत्त्वेच। प्रत्ययत्वोपस्थितेरसत्वेपि निपातज

न्योपस्थितेःसत्वेन व्यभिचाराभाव इति भाव इत्यपि कश्चित्। तन्नु अन्यतमत्व
निवेशाच्चिन्त्यं। नन्वव्ययातिरिक्तत्वनिवेशे गौरवमत आह। अत एवेति। अव्यया
तिरिक्तत्वनिवेशादेवेत्यर्थः। भेदेनेति। इवार्थसादृश्ये चन्द्रस्य प्रतियोगितयान्व
य इत्यर्थः। चन्द्ररूपनामार्थस्य सादृश्यरूपनामार्थे निपातातिरिक्ते प्रतियोगितासंबंधे
नान्वयोपपादनाय तादृशनियमे संकोचकल्पनाया आवश्यकत्वादेव। घटेति।
घटतदभावयोः प्रतियोग्यनुयोगिभावस्य संसर्गमर्यादयैव मानात् लक्षणाकल्पन
मनर्थ्यमिति भावः। मानाभावात्। नामार्थयोरित्यादि निपातातिरिक्तस्थलेइति सङ्को
चेमानाभावादित्यर्थः। नन्वेवं चन्द्र इव मुखमित्यादौ चन्द्रइवार्थयोः कथमन्वय
बोध इत्यत आह। चन्द्र इवेति। तत्सदृशेति। चन्द्रसदृशेत्यर्थः। नन्वेवमिवपदमन
र्थकमत आह। इवपदेचेति। तात्पर्येति। केवलं चन्द्रपदान्न सादृश्यबोध इति

पा

नि

चंद्रपदस्य चंद्रसदृशलक्षणायां इवपदसमभि व्याहारं विनेत्यर्थः॥ नन्वेवं तल्ल

क्षणाकल्पनमपेक्ष्य वरं इवपदस्य नियतं प्रतीयमाने सादृश्ये शक्तिरेवास्तां

[illegible]॥ अत एवेति॥ चंद्रपदस्य चंद्रसदृशलक्षकत्वादेवान्यथा लक्षणाकल्पने॥

४ प तदनुपपत्तेः चंद्रमिवेति॥ द्वितीयानुपपत्तेः चंद्र पदस्य चंद्रसदृशे लक्षणा

यां तस्याभेदेनान्वयात् अभेदान्वये च विशेषणविशेष्यवाचकपदयोः समानवि

भक्तिकतायास्तंत्रतया चंद्रमिति विशेषणवाचकपदोत्तरं द्वितीयाया आवश्यकी

भवन्मते च इवार्थसादृश्यस्याश्रयतया मुखेन्वयेनाभेदान्वयाभावात्॥ द्वितीया

अनुपपन्नैव चंद्र इव मुखं पश्य॥ मित्यतोपि तादृशाबोधोपपत्तेरिति भावः॥ न

८५ नु चंद्रपदस्य चंद्रप्रतियोगिकमर्थः सादृश्यं शक्यस्यैवादेः सादृश्याश्रये लक्षणा त ८५

स्याभेदेन मुखेन्वयस्तदा चंद्रमिव मुखमित्यत्र समानविभक्तिकत्वोपपत्तिः॥

वत्तिलक्षणानन्यपदं च नालंपश्य॥ हकमित्यपि प्रसज्येतिचेत् न। भूतलेन घटस्यानीनाव॥ ३.१

संभवत्येव न घटं पटं इत्यत्रेवेवान्यथा॥ तत्रापि घटपदस्य घटाभाववैशिष्ट्यबोधस्य शक्ता

नन्योजननात्॥ अभावस्य तस्यानन्वयेऽभाववत्तिलक्षणां विना केवलचंद्रपदेन प्रयोग

तृशत्या इवपदात्सादृश्यविशेष्यकबोधाभावात्॥ इवादेः सादृश्ये शक्तेरेवाकल्पनेन तेषां

निरर्थकत्वमेवेत्याशयात्॥ इवादिना सादृश्यशक्त्यनुपगमेन श्रुतमितिवत् द्योतकास्ताहि पि४

अस्तु चेति॥ षष्ठ्यर्थेप्रतियोगित्वरूपे विभक्तौ चंद्रपदोत्तरप्रथमाविभक्तौ इवपदो

त्तरं च लुप्तविभक्तेरनुसंधानं वा॥ तथा च ननाम्नो यथोरितिश्रुतातिसंबंधो चरतीति भावः॥ नन्व

४ सुंविभक्तौ न लक्षणोत्तत आह॥ अनुशासनेति॥ नियतप्रयोगाद्धि केचित् येषामनुशास

नवलादित्यर्थः॥ अनुशासितविभक्त्यपातिरिक्तस्थलेषु शिष्टैः क्लृप्तलक्षणा नाम्नीति गाव

नयेति॥ घटो नास्तीत्यत्र घटपदोत्तरप्रथमाविभक्तेरपि प्रयोगिसलक्षणेत्यर्थः॥ भूत

लेघटस्यैव केवलैः इवेत्तिन प्रयोगे॥ चंद्र इव मुखमित्यत्र लुप्तविभक्त्यनुसंधा

नापि बोधात्॥ चंद्रपदस्य चंद्रसदृशलक्षकत्वमबोधितमितिध्रुवापि इवादिनाशत्वासा

दृश्यबोधनात्तेषां निरर्थकत्वमेवेत्यस्वरसोऽस्तु वेमनेन सूचितः॥ इष्टिंवा गौरव न गत्वेतस्य

नि४

~~पृथिवीति निर्गंधजलेतरत्वाभावोजलत्वनिरूपितत्वयबोधस्वीकारे आवश्यकत्वमिति भावः~~
~~एतन्नत्वेनाह ।~~ पर्यवे दितिनियमानुपपत्तेः ।। पृथिवीति निर्गंधगंधाभावेजलत्वनिरूपित
त्वयबोधस्वीकारे समानविशेष्यकत्वानुपपत्तेः ।। पृथिवीति निर्गंधः जलत्वस्याभावीयो
ऽधयत्वान्वयबोधस्वीकार आवश्यकत्वमभिप्रायेणैव मतेऽप्याह ।। अन्वेति विनानुप
पित्यांगंधो नजलत्वस्यांशे समानविशेष्यकत्वानुरोधेन तथान्वयस्वीकारे । पिघटत्वे
घटो नास्तीत्यत्र तत्त्वे निर्घटाभावस्यान्वयबोधे चाभावस्यत आह । घटो न
स्तीत्यत्रेति । एकत्वादिरितीति । भावनान्वयिन्येव संख्यान्वयेन घटो नास्तीत्यत्र घटाभावो
स्तीत्याश्रयत्वान्वयस्वीकारे भावनाविशेष्ये घटाभावे द्वित्वादेरसंभवितया घटो न
स्तीति न स्यात् ।। तत्र एकत्वबोधे बाधकाभावात् । घटौ नास्तीति स्यात् । भावनावि
५६ विशेष्ये इति संख्याबोधकत्वादाख्यातस्येत्यर्थः ।। तर्हि द्विदृशोन्वयबोधे इत्यत आह ५६
द्वित्वेति । तत्र घटो नास्तीत्यत्र सम्बन्धानिरूपितवाधिकतया आख्यातार्थविधेयेन

वार्थकतयाख्यातस्याश्रयत्वार्थकत्वे यावृत्तत्वेन निरूपितविधेयमानत्वाश्रयोघ
टाभावस्त्वन्वयबोधस्वीकारे भावनान्वयिनि संख्यान्वयनियमात् भवन्मते विध
मानत्वाश्रयत्वेरूपाख्यातार्थभावनायामभावस्यैवान्वयेनाभावस्यैकत्वात् घटौ ना
स्तीति स्यात् ।। मन्मते च सप्तम्या आधेयत्वमर्थः ।। तथा च प्रतेनन्वेभावीयो घटश्च ष
स्तित्वाश्रय इति बोधोदयेन भावनाया घट एवान्विततया घटद्वये एकत्वबाधासं
भवात् घटौ नास्तीत्यस्यापत्तिरिति भावः ।। केचित्तु तत्रैतदभावप्रतियोगी घट
अस्तित्वाश्रय इत्यन्वयबोधस्वीकारे किंनिरूपितास्तित्वाश्रयो घटाभाव इत्या
कांक्षाया अनिवृत्तेर्न घटे भावनान्वय इति भावः ।। कथं तर्हीति । तत्तन्निरूपिता
स्तित्वाश्रयो घटाभाव इत्यन्वयबोधस्वीकारे हीत्यर्थः ।। इत्यादीति ।। भावनान्वयि
न्यभावे द्वित्वाभावात् ।। घटौ नस्त इति नकारे स्याच्च घटौ नास्तीत्यर्थः । भावेनेति
भावनाया अन्वयायोग्यभावस्य प्रतियोगिनि संख्यान्वय इत्यर्थः तथा च भावना

न्वयित्वेव संख्यान्वय इतिनसमभिव्याहारे नियमः नसमभिव्याहारस्थलेऽनुभा
वनान्वय्यभावप्रतियोगिनि संख्यान्वय इतिभूतलेतरकल्पने नैव घटो नस्त इ
त्यत्र घट एवद्वित्वान्वयात् न घटौ नस्त इत्यस्यानुपपत्तिर्न वा घटौ नास्तीत्यस्यापत्ति
रिति भावः। कथमिति। अन्यत्र भावेनान्वयित्वेव संख्यान्वयस्य इष्टत्वात्।
कथमत्र भावनान्वय्यभावप्रतियोगिनि संख्यान्वय इत्यर्थः। तथैवेति। अभावप्रति
योगित्वेव संख्यान्वयप्रतीतेरित्यर्थः। तथाच नञ्समभिव्याहृतार्थसंख्याप्र
कारकबोधे नञर्थाभावप्रतियोग्युपस्थितित्वेन हेतुत्वं कल्प्यत इति भावः। नञ्स
मभिव्याहारे यद्विशेष्ये यद्विशेषणं प्रतीयते तत्रैव तद्विशेषेण तद्विशेषणं भावः प्रत्या
८१ य्यते अन्यथा वचनैकानियमानुपपत्तेः इत्यं चं भूतले इत्तित्वाभाववान् घट इत्येवान्व ८१
य इति नियमवादिनां मतमतं माह। परे त्विति। इह भूतले घटो नास्तीत्यत्र नञ्
र्थस्य नाञ्थस्यानिमेधेऽन्वयो न इष्टश्चरन्तु मत आह। न पचतीति। पाकानुकूलकृत्य
न भा ४

भाववांश्चैत्र इति वद्भूतलास्तित्वाभाववानेकश्चैत्र इत्यन्वयबोधे बाधकाभाव इ
त्यर्थः। नानइति। घटस्य विशेष्यत्वादित्यर्थः। द्विवचनेत्ति। घटौ नस्त इति द्विवच
नानुपपत्तिरित्यर्थः। इदमुपलक्षणं। घटो नास्तीत्येकवचनापत्तिरपि नेत्यपि
द्रष्टव्यं। अभावस्य विरोधित्वे घटौ नस्त इति द्विवचनादिकं न स्यात्। विशेषण
पदस्य विशेष्यपदसमानवचनत्वनियमात् परं त्वभवस्यैकत्वात् घटो नास्ती
त्येकवचनमेव स्यात्। घटस्य विशेष्यत्वे च तस्य द्वित्वबहुत्वयोः क्रियापदस्यापि द्वि
वचनादिकं। साध्विति भावं घटौ नास्ति त्वयपदावितिद्विवचनेन द्वित्वावच्छे
एकत्वान्वयासंभवाद्योग्यत्वं घटौ नस्त इत्यत्र च घट द्वयेन्वयसंभवात्। योग्य
त्वमिति नान इत्यस्य भावार्थत्वापि कश्चित्। ननु भूतले घटो नास्तीत्यत्र सत्
त्यानिरूपितं विद्यमानत्वाश्रयत्वाभाववान्। घट इत्येवं। बोधस्तत्र चाख्यातार्थ
त्वार्थकतया अस्तिधातोर्विद्यमानत्वार्थकतया आख्यातस्याश्रयत्वार्थकतया भूतलान्निरूपित। १

~~मियमानत्वाश्रयत्वार्थकतयाभ्रमत्वापत्तिः~~। अयत्वस्याभावएवविशेष्योनतुघटवृ
त्तिभावनविशेष्यगतसंख्याबोधकत्वाभावात्कथंद्विवचनोपपत्तिरितिचेत्। साक्षा
त्परंपरासाधारणभावनाविशेष्येसंख्यान्वयस्वीकारेणप्रकृतेपरंपरयाभावनावि
शेष्यत्वस्यघटेसत्वादिति एवंपरंपरयाविशेषणस्यापिविशेष्यसंसर्गेणवचनार्थसम्भवे
यंचैत्रौनपचतीत्यादौद्वित्वादितिबोध्यं। ननुतथापिद्वित्वावच्छेदेनघटत्वावच्छेदेनभूत
ल निरूपितविद्यमानत्वाश्रयत्वाभावस्यान्वयेएकघटवति भूतले भूतलेघटौनस्त
इतिनस्यात्। घटवृत्तिद्वित्वसमानाधिकरण्येननञर्थान्वयेचघटद्वयवत्यपिघटौ
नस्तइतिस्यात्। अधिकरणांतरीयघटे भूतलेऽस्तित्वात्तदभावादितिचेन्न। घटवृत्ति
८८ द्वित्वत्वावच्छेदेननञर्थसमानाधिकरण्यान्वयात् अधिकरणांतरीयद्वित्वेननञर्थ
समानाधिकरण्येपिएतद्भूतलवृत्तिघटवृत्तिद्वित्वेभूतलास्तित्वाभावसमानाधि ८८

करण्याभावात्घटद्वयवतिघटौनस्तइत्यस्यापत्तिरितिध्येयं। नन्वेवमिति। सर्वत्रै
वानुयोगिवृत्तित्वाभावस्यप्रतियोगिन्यन्वयस्वीकारेइत्यर्थः। जातौनसत्तेत्यस्यजाति
वृत्तित्वाभाववतीसत्तेत्यर्थः। तच्चसंबंधसामान्यावच्छिन्नजातिवृत्तित्वाभावोवा
समवायसंबंधावच्छिन्नजातिवृत्तित्वाभावोवाबोध्यः। तत्राद्येआह। जातिवृत्तित्वसामा
वस्येति। एकार्थसमवायेनसत्तायाजातौसत्वेनतदभावबोधः। नोसंभवादित्यर्थः
नचैककालीनत्वादिवदेकार्थसमवायस्यापिवृत्तिनियामकतयातेनसंबंधेनसत्ता
या। सत्वेपिसंबंधसामान्यावच्छिन्नवृत्तित्वाभावोस्त्येवजन्यमात्रस्यकालोपाधितया
मूर्तमात्रस्यदिगुपाधितयाकालिकदैशिकविशेषणतयोस्तत्रासंभवितयातदादा
योपिवृत्तिविरहादितिवाच्यं। जातिःसतीतिप्रतीतेस्तस्यापिवृत्तिनियामकत्वा
त्। द्वितीयेआह। जातिसमवेतत्वस्येति। प्रतियोगिप्रसिद्ध्यानसमवाय
संबंधावच्छिन्नजातिवृत्तित्वाभावःप्रत्येकंशशकरविभावः। यागतिरिति। जातौ

नसत्तेत्यत्र जातिहत्तिःसत्ताभाववत्त्वमुपपन्नावपि जातिनिर्सत्ताहत्तिरित्यत्र संबंधसामा
न्यावच्छिन्नसत्ताहत्तित्वाभावस्य जातावसत्त्वान्॥ समवायसंबंधावच्छिन्नसत्ताह
त्तित्वस्य चाप्रसिद्ध्या निषेधासंभवाच्चेत्तत्राप्यर्थः॥ अयोग्यमेवेति॥ निषिद्ध
तानन्वयसमर्थकमिति भावः॥ इदं वा जातिनिर्सत्ताहत्तिरिति वाक्ये॥ यथाक
थंचिद्योग्यत्वोपपत्तावप्ययोग्यत्वमन्याय्यमतआह॥ इतिपदं वेति॥ साक्षादितिजा
तिनिर्सत्ताहत्तिरित्यत्र लक्षणया सत्तानिरूपितसाक्षात्संबंधावच्छिन्नहत्तित्वाभावः
प्रतीयते सत्तानिरूपितसाक्षात्संबंधावच्छिन्नहत्तित्वं च स्वरूपसंबंधमादाय प्रमे
यत्वादौ प्रसिद्धमिति तेनोक्तदोषइति भावः॥ उक्तमिति॥ जातौ न सत्तेत्यपि वाक्यम
८९ योग्यमेव योग्यत्वे वा जातिनिरूपितसाक्षात्संबंधावच्छिन्नहत्तित्वाभावः। प्रतीय
त इति भावः॥ केचित्तु सत्तापदं समवायपरं समवायसमर्थं चानुयोगित्वं तथा च जातिमत्त्वनु ८९
योगिकत्वाभाववान् सत्तासमवाय इति बोधइत्याहुः। समवेतेति पदव्याख्यानेन

मायत।

वाच्यय२ २

तथाबोधइत्यन्ये॥ शंकते॥ नत्वापत्तिरिति॥ निषेधः प्रतियोगित्वनिषेधः॥ कथमिति॥ नञ्मा
र्थयोरन्वये नैवेत्यत्रेति भावः॥ निपातेति॥ निपातातिरिक्तस्थल एव नामार्थयोरिति
व्युत्पत्तिरिति भावः॥ ननामार्थमात्रस्य ननामार्थसामान्यस्य प्रतियोगीत्वेनान्वयः स्त्र
चितः सच व्युत्पत्तिसंकोचे गौरवं॥ एवं जातौ न सत्तेत्यत्र जातिवृत्तिःसत्ताभाव इत्येता
वतैवोपपत्तौ लक्षणादिकल्पनेपि न हीं जातिनिर्सत्ताहत्तिरित्येतत्र लक्षणकल्पनाद
न्यत्रापि तथैवेत्यत्र प्रमाणमस्ति॥ भावनान्वयप्रतियोगिहत्तिसंख्याबोधकत्वेनैव
वचनेन नियमस्य प्रयुपपत्तिरिति नाकिंचिदेतत्॥ किंनीयामकमिति॥ नञोऽभा
वमात्रमात्रशक्तत्वेन घटो नायमित्यत्रात्यन्ताभावः॥ उक्तत्वेन घटत्वत्र चान्योन्याभा
वः प्रतीयेतेत्यर्थः सामग्र्याः तुल्यत्वादिति भावः॥ शंकते अधिकरणेति॥ नत्र ज
न्यात्यन्ताभावविषयकशाब्दत्वावच्छिन्नं प्रतिअनुयोगिवाचकपदसमभिव्याहृत
सप्तमीपदज्ञानत्वेनान्योन्याभावविषयकशाब्दबोधेऽनुयोगिवाचकपदसमान

विनत्वैकप्रतियोगिवाचकपदजन्योपस्थितित्वेनच कारणत्वान्न पूर्वोक्तदो
षापत्तिः सामग्र्या विलक्षणत्वादित्यर्थः। नपचतीति। पाकानुकूलकृत्यभाववां
श्चैत्र इत्यन्वयानुयोगिवाचकपदसमभिव्याहृतनञ्पदज्ञानस्याभावेन
नतस्याः सामग्रीत्वमित्यर्थः। ननु वैयाकरणमते आख्यातस्य कर्तृशक्ते
तया पाककर्तृभिन्नश्चैत्र इत्येवं बोधान्नेदमत्यन्ताभावबोधोदाहरणं॥
घटतर इत्यत्राह। चैत्रस्येति। चैत्रस्वत्वाभाववद्धनमित्यर्थः षष्ठ्याः स्वत्वम
र्थो नतु स्वामित्वं। स्वत्वनियामकसंबंधस्याभावप्रतियोगितानवच्छेदक
त्वेन निरूपकतासंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधा
९० संभवात् आश्रयतासंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधस्वी ९०
कारे च चैत्रीयेपि धने नेदं चैत्रस्येति प्रसंगात्॥ स्वामित्वस्य चैत्रवृत्ति

त्वेन धने आश्रयतासंबंधेनासत्वात्। यदि च तादृशाभाववत्त्वस्वत्वनियामकसंबंधांतर
स्याप्यभावप्रतियोगितानवच्छेदकत्वस्वीकारे स्वामित्वमेव षष्ठ्यर्थस्तदापि विनिगम
नाविरहेण स्वत्वमप्यर्थोऽवसेयः। अन्योन्याभावबोधे समानविभक्तिकत्वं स्यानि
यामकत्वे व्यभिचारमाह। अलघ्विति। क्रियाविशेषणस्थले कर्मविभक्तिं नपुंसक
लिंगत्वं विशेषणविभक्तिश्च साधुत्वार्था तथा च लघु भिन्नपाकानुकूलकृतिरि
त्यन्वयबोधेन्योन्याभावविषयके विशेषणविशेष्यवाचकपदयोः समानवि
भक्तिकत्वाभावेन व्यभिचार इत्यर्थः॥ नञ् विनिर्मोकेन नञ्समभिव्याहारस्य
लोके तन्त्रेति यथा भूतले घट इत्युक्ते भेदान्वयबोधे समानविभक्तिकपदत्वे
न कारणतया भूतलघटयोरभेदान्वयबोधे आकांक्षा अतो नञ्समभिव्या
हाराभूतत्वे। न घट इत्युक्ते भूतले घटान्योन्याभावबोधः। अत्रेति।

नञ्समभिव्याहारे प्रतियोग्यनुयोगिपदयोरभेदान्वयोऽऽकांक्षाशून्यस्य
त्वमित्यर्थः॥अन्येति॥अन्योन्याभावबोधकत्वमित्यर्थः॥यथा पचतीत्युक्ते पाकानु
कूलकृतिचैत्रयोरभेदेनाकांक्षा किं वाश्रयतयैवेति न पचतीत्यत्र नान्यो
न्याभावबोधः।किं त्वत्यंताभावस्येति तथा च प्रतियोग्यनुयोगिनोरभेदान्वय
बोधे यादृशसमभिव्याहारज्ञानं कारणं तयोरन्योन्याभावबोधे तादृशसमभि
व्याहारज्ञानं कारणं एवमत्यंताभावबोधे भेदान्वयोऽऽकांक्षाशून्यप्रतियोग्य
नुयोगिवाचकपदसमभिव्याहृतनञ्पदज्ञानं कारणमित्यर्थः।तदेवोपपा
दयति॥अस्ति चेति॥नञ्सत्वेन नञ्समभिव्याहारो घटपटयोरिति विशे
षणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्य विरुद्धविभक्तिराहित्य ६१
स्य वा भेदान्वयबोधे आकांक्षात्वादिति भावः।तत्र न घटः पट इत्यत्र।नाभेदे
म

ति॥तत्वं घटः पटः घट इत्येवान्वयबोधात्।आधारत्वस्य सम्पर्थतया नाभेदा
न्वयबोधकत्वमिति तत्र स्वेसंसर्गाभावप्रत्यय एवेति भावः॥अत्र चैन्योन्याभाव
बोधे विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्य तत्रत्वे दधि
न सुंदरमित्यत्र तु घविभक्त्यनुसंधानेन शाब्दबोधोपपादनेऽपि चैत्रेण पचती
त्यत्र व्यातस्य कर्तरी लक्षणया चैत्रे पाककर्तुः भेदान्वयात् न स्तोकं पचतीत्या
दौ पाके स्तोकस्याभेदप्रतिपादनात् च तत्र समानविभक्तिकत्वाभावाद्व्यभिचारः
विरुद्धविभक्तिराहित्यस्य तत्रत्वे च प्रतियोगिपदोत्तरविभक्तिविरुद्धविभ
क्तिशून्यानुयोगिपदसमभिव्याहृतनञ्पदत्वे नानुयोगिपदोत्तरविभक्तिवि
रुद्धविभक्तिशून्यप्रतियोगिपदसमभिव्याहृतनञ्पदत्वेन [redacted] वा हे
तुत्वेन पचतीत्यादौ प्रतियोगिपदोत्तरविभक्तेरप्रसिद्धेः न स्तोकं पचतीत्यादौ

८

वत्तुयोगिक्रियापदोत्तरस्तु विभक्तेश्चाप्रसिद्धतयानानुगतरूपेण हेतुत्वंच त
नयोरन्यतरस्य हेतुत्वे चाननुगमः। किंचविशिष्यानुयोगिप्रतियोगुपस्थापक
नामपदयोःसमभिव्याहारे समानविभक्तिकत्वे तत्रैव घटो न नील इत्यत्र घटपद
धीन्वितनीलपदार्थान्योन्याभावबोधेनालपदस्यसमानविभक्तिकघटपदसमभि
व्याहृततत्र पदत्वेन कं चैत्रो न पचतीत्यादौ धर्मिपराख्यात समभिव्याहृततर। अत्र
त्रैपदत्वेन नस्तोकं पचतीत्यादौ क्रियाविशेषणसमभिव्याहृतद्वितीयांतस्तो
कादिपदविशेषणस्याद्याभासन्नानावादिनिः सद्वयप्रकृतेविनत्रैससमाव्याहृतं
घटपदेतरप्रथमाबाधामध्ये [illegible] न पचतीतिव्युत्पत्तिविध
२२ प्रकृतानन्योन्या [illegible] निर्दिष्टमसुकृतिनियतेनिनियतत्वे यत्रियोगितावच्छे २२
दकेनियतैः प्रतियोगिता [illegible] पदेननियतत्वप्रयोगोपेयांतेकेचिद यथाः

परंस्यादित्यनेन परनिपातस्याप्यनुशासनमिति भत्वात् कर्मधारयस्ये सोपग
मा[illegible]प्य
समभिव्याहृततत्रपदत्वेन हेतुत्वेतिवोध्यं। ननु पुरुषोत्तमत्वं [illegible] वत् कर्मधार [illegible]पापि
यकर्मधारयौ विशेषणवाचकपदस्य पूर्वभाव नियमे नउत्तमपदस्य पूर्वनि विशेष णं
पातापत्तेः नच विशेष्यविशेषणयोः कामचार इति वाच्यं। जातिनिमित्तकेगु
णनिमित्तकं विशेषणमेवेति नियमात् अत्रैव तत्रैव नीलमितिनप्रयोगः।।
नापिषष्ठीसमासः। न निर्धारणे इत्यनेन निर्धारणे षष्ठीसमासनिषेधादिति
तत्राह संदेह इति। पुरुषोत्तम इत्यादौ कचिद्विशेषणं विशेष्येण बहुलमिति
सूत्रे उभयोर्यानन बल्वाद्विशेषणविशेष्यतावच्छेदकयोः परस्परव्यभिचारि
त्वएव कर्मधारय इति भावः। एवं चाचक्षुः [illegible] घटादिसाधारणे
नपुरुषावधिकोत्तमत्वरूपत्वासंभवेन सार्वकालिकमत्वरूपोत्तमत्वस्य पुरु
षत्वेव्यभिचारित्वाभावात् कर्मधारय इतिचेन्न उद्देश्यतावच्छेदक

विधेयतावच्छेदकयोरन्यतरव्यभिचारित्वेऽपि कर्मधारयात् अत एव शिंशपावृ
क्षेति संगच्छते। एतेनोद्देश्यतावच्छेदके विधेयभिन्नत्वनियमे वर्तते भिन्नत्वे सं
दायमतमपास्तं प्रमेयवान्हिमाद्रीत्यादावगतेः। न चैवमपि एवं द्वयस्येत्यादा
वगतिरिति वाच्यम्। तत्रानाकलनात् अभेदार्थकषष्ठीसमासोपगमात् अन्यथा अवगते
रगतेः। अथवा षष्ठीसमास एवायं न च निर्धारणषष्ठ्यन्तेन निषेधः सुकृताया
पि तया जातिगुणक्रियादिभिरेकदेशस्य पृथक्करणं हि निर्धारणं। निर्धार्य
त्वविशिष्टसामान्यधर्मावच्छिन्नादेस्तया जातिगुणक्रियाद्यवच्छेदेन यत्किंचि
द्धर्मिणः भेदबोधनमिति यावत्। अत्राङ्गतस्य भवति [illegible] विशिष्टपृथक्करणा
९३ करणाभावात्। पुरुषोत्तमपदस्य योगरूढत्वेन तत्राभेदेऽपि समासवार्त्तिकस्य तत्त्व ९३
दनुपस्थितेः। यथा नराणां क्षत्रियः शूरतम इति न तु नरक्षत्रियः शूरतम इति। अ
पि च निर्धारणरूपार्थे षष्ठीसमासनिषेधोऽपि राहोः शिर इतिवदभेदार्थकषष्ठी

समासे बाधकाभावात्। अत्र च निर्धारणषष्ठ्या अभेदोऽर्थः। निर्धार्यपदार्थविशेष्यतया
प्रकृत्यर्थविशेषणतया चाभेदान्वयः। नराभिन्नः क्षत्रियः क्षत्रियान्यनरान्यशूरतमाभि
न्न इत्यन्वयबोधः। शूरतमत्वावच्छेदेन क्षत्रियान्यनरान्यत्वान्वयः। नातः क्षत्रियान्यनर
स्य शूरतायां तादृशप्रयोगः। घटानां क्षत्रियः शूरतम इति विजातीयापेक्षया निर्धारणा
पत्तेरभेदोऽर्थः। अभेदसंसर्गकबोधे विरुद्धविभक्तिराहित्यस्य तन्त्रतया संसर्गमर्या
दया तज्ज्ञानसंभवात्। केचित्तु निर्धारणषष्ठ्या अभेद एवार्थः नराभिन्नक्षत्रियस्य तादा
त्म्येन शूरतमत्वावच्छेदेनान्वयान्नराहोः शिर इत्यादिना विशेषः। शूरतमश्चैव नरनिष्ठशूर दो ५
तमत्वविशिष्टः तेन देवानामपि शूरत्वे तादृशप्रयोगानुपपत्तिरित्याहुः। तन्न क्षत्रिय
मुख्यविशेष्यकत्वेन वा पत्त्यापादनेः नराणां प्रमेयः शूर इत्यादिप्रयोगापत्तेश्च। क्षत्रियनरः
शूरत्ववान् क्षत्रियाभिन्ननरः शूरत्वाभाववान्भिन्नत्वं ऋजुमभेनमपि प्र ~~[illegible]~~
धर्मतार्थमुख्यविशेष्यकबोधस्यानुभवापलापापत्तेरभादेर्यं। क्षत्रियान्यनरान्यत्वव्या

पकान्ने देप्रतियोगितावच्छेदकत्वं विशिष्टतान्यसंबंधेनन राजिन्नवृत्तियेक्षरनमस्या
न्वयरूत्यभेदएवनिर्द्धारणषष्ठ्यार्थइत्यपरे॥अन्येतुनिर्द्धारणषष्ठ्यास्त्वान्यत्वमवच्छे
दकार्थः व्यवच्छेदश्चद्विरूपो त्येतानाभावोन्योन्याभावश्च।षष्ठीसमासिव्याहतप्रातिप
दिकस्यचस्वार्थीभूतनन्नादन्यस्मिन्षष्ठ्यर्थेव्यवच्छेदेचाधिकरणत्वेनन्वयःदृष्टोर्थौका
र्थः।प्रतियोगित्वेनचविधेयपदार्थेभासतेद्वित्रियाणांकर्णः प्रचुरंददातीत्यादौकर्ण
पदस्यकर्णःकर्णान्यश्चार्थःद्वित्रियाभिन्नकर्णः प्रचुरदानकृतिमानद्वित्रियाभिन्नःकर्ण
न्यःप्रचुरदानकृत्यभाववानित्यन्वयःगवांकृष्णासंपन्नक्षीरेत्यत्रकृष्णापदस्यकृष्णा
२४ तदन्याचार्थः।गवाभिन्नाकृष्णासंपन्नक्षीरागवाभिन्नाकृष्णान्यासंपन्नक्षीरेतिभि
न्नेत्यन्वयबोधइत्याहुः।पुरुषेषूत्तमइतिसप्तमीसमासएवनचनिर्द्धारणेषष्ठीसमास २४
वत्सप्तमीसमासोपिनिषिद्धइतिवाच्यं।स्वरविशेषनिषेधस्यैवसूत्रप्रयोजनत्वात्ष
ष्ठीसमासेपूर्वपदस्योदात्तत्वंसप्तमीसमासेउत्तरपदेघृतात्स्वरएवाजतिष्ठतइति

सप्तमीसमासोनिर्धारणरूपेर्थेपिसाधुरित्यपिकेचिदितिहलंतपल्लवितेन।ननुस्वा
पत्तिशब्दप्रयोगेकिमित्यवाचकंप्रयुंजामहेइतिन्यायेनतटेघोषइतिविहाय
गंगायांघोषइतिलक्षणामुख्यप्रयोगेबीजाकांक्षायांशैत्यपावनत्वादिप्रतीति
रेवप्रयोजनत्वेनावसीयतेसाचरूढ्याततत्त्वानोपयाद्यायितुंशक्येतिबीजनारव्यातिरि
क्ताहनिरूपयेत्यतआह।व्यंजनाचेतिनवमंतरमिति।शक्तिलक्षणातिरिक्तानष्ट
त्तिरित्यर्थः।तथाचयद्यपिशक्तिलक्षणात्मिकानदर्शक्तिलक्षणातिरिक्तस्याभावः।य
द्विचन्नशक्तिलक्षणात्मिकानतदाहतिरितिअतिरिक्तवृत्त्यभावसत्वेमव्याहतं
तेनननसिद्धसिद्धव्याघातः॥कथंनहिशैत्यपावनःकादिप्रतीतिरित्यतआह।तदे
वे तोधैर्यंत्ता।तथैदर्थेति।।गीगार्थप्रतिपत्त्युपपत्तेरित्यर्थःघस्यदातुमिन्योरिवसामग्रीतदा
भिदइत्याशंकते।नान्विति।इदलक्षणयेवतदर्थसिद्धिरूपंमुख्यार्थइति॥गंगाघोष

इत्यत्र गंगापदमुख्यार्थप्रवाहे तत्रानुपपत्तिः घोषाधिकरणत्वानुपपत्तिर्लक्षणा
बीजमित्यर्थः ॥ ननु किमेतावतेत्यत आह ॥ न चेति ॥ नहीत्यर्थः ॥ चापि स्मार्त्तमिति
गतासि न पुनस्तस्याधमस्यांतिकमित्यत्र गतामपि दूतीं प्रति न गतासीति मुख्या
र्थान्वयानुपपत्तिरस्त्येवेति अधमपदे व्यंजनासंभवत्येवेत्यत आह ॥ सर्वत्रेति ॥
तदेवाह ॥ गच्छसीति गच्छ ~~सीति~~ गच्छसि चेत् कांत पंथानः संतु ते शिवाः ममापि
जन्म तत्रैव भूयाद्यत्र गतो भवानिति अत्र तव गमने मे मरणं भवितेति त्वं मा गा
इति व्यंजने तत्र च मुख्यार्थान्वयानुपपत्तेर्लक्षणाबीजस्याभावान्न लक्षणासंभ
वइति व्यंजनास्वीकारमावश्यकमिति भावः ॥ अन्वयानुपपत्तिर्लक्षणाबीज
८५ मित्यत्र बीजशब्दार्थं विवृण्वन् दूषयति ॥ किमिदमिति ॥ तज्जनकत्वं लक्षणा २५
जनकत्वं ॥ नेति शक्यसंबंधो हि लक्षणा स च गंगायां घोष इत्यत्र गंगातीरयोः ॥

संयोगस्तत्र च नानुपपत्तिज्ञानं कारणमित्यर्थः ॥ ततो ज्ञापकत्वं लक्षणाज्ञापकत्वाच्च
तुरादीनेति ॥ यत्र गंगापदस्य गंगातीरत्वेन लक्षणा तत्र तत्संबंधविषयकशाब्दात्मक
ज्ञानस्यानुपपत्तिज्ञानव्यतिरेके ॥ नुदयेपि चतुरादीनां तल्लौकिकप्रत्यक्षे जननी
येतदनपेक्षणात् व्यतिरेकव्यभिचारेण न सामान्यतस्तज्ज्ञापकत्वं संभवतीति भा
वः ॥ नव लक्षणाविषयकशाब्दबोधजनकत्वमेव न तत् किंतु वाच्यं ॥ यत्र गंगायां इत्य
तीरे जहत्स्वार्था लक्षणा तत्र गंगातीरसंबंधस्य शाब्दबोधाविषयत्वेनान्वयव्यति
चारेण न तथात्वसंभव इति एवमग्रेपीति हृदयं ॥ नापीति ॥ तत्तात्पर्यं ग्राहकत्वं शक्य
संबंधरूपलक्षणा तात्पर्यग्राहकत्वं ॥ तात्पर्येति ॥ प्रकरणादिनापि तद्ग्रहात् तात्पर्य
ग्रहादित्यर्थः ॥ तथा च मुख्यार्थान्वयानुपपत्तिज्ञानस्य व्यभिचारान्न सामान्यतस्ता
त्पर्यग्राहकत्वमेवं च [illegible] चित्तदपदे णोपि सर्वत्रानपेक्षिततया प्रकृते प्रकाशं

तात्पर्येति तात्पर्यस्य तात्पर्यविषयस्य भोजनस्य घोष... प्रवेशस्य ... मुख्यार्थे

तत्रैव तात्पर्यग्रहसंभवेन लक्षणायां बाधकाभावस्तथा च। तत्र लक्षणाबी
जत्वं। मा भूदिति॥ यष्टीः प्रवेशयेत्यत्र यष्टिपदस्य यष्टिधरे लक्षणा॥ न च तत्र मु
ख्यार्थे यष्टीप्रवेशनान्वयानुपपत्तिरिति व्यभिचारादित्यर्थः॥ ननु मुख्यार्थे इत
रानुपपत्तिर्न लक्षणाबीजमपि तु तात्पर्यविषयानुपपत्तिरेवेति को व्यभि
चार इति शंकते॥ तात्पर्येति॥ अत्रापीति। यष्टीः प्रवेशयेत्यत्रापीत्यर्थः। अ
स्तीति। भोजनप्रयोजकप्रवेशनमेवात्र तात्पर्यविषयः तदनुपपत्तिर्मुख्यार्थे
ऽस्त्येवेत्यर्थः॥ सर्वत्रेति गंगायां घोष इत्यादावपीत्यर्थः। अस्तु को दोष इ
त्यत आह॥ साचेत्यपीति॥ सा च तात्पर्यानुपपत्तिश्च इहापि गंगायां घोष इत्यादि
व्यंजनास्थलेपि॥ अस्तीति॥ अत्र कोतस्य गमनाभाव एव तात्पर्यविषयः। तद
नुपपत्त्या गमनबोधकपदस्य गमनाभावे लक्षणयैवोपपत्तौ नातिरि
क्तवृत्त्यंतरकल्पनं गौरवादिति भावः। लक्षणाप्रयोजनं गंगापदस्य तीरे लक्ष ९६

णो विता ... नुपप त्तिः ... र्थे बाध: